टिप्पणी—नटी = वेश्या । सीमन्तोऽस्याः अस्ति या सा सीमन्तिनी ... सीमन्त

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यस्मिन् सर्वाङ्गसङ्गः सकलगुणगणः सोऽदम्भोऽलभ्यः
तस्मिन्नेच्छन्ति काले परमसुखकरे कामपि नेपथ्यलक्ष्मीम् ॥ २८ ॥]

विचक्षणा—देव ! एदं विण्णवीअदि—ण केवलं देवीए णिओएण तिस्सा अणुगद ह्मि, तारामेत्तीए वि सअित्तणं पत्ता कप्पूरमंजरीए । तेण तक्कज्ज-सज्जा अहं उणो वि ओलग्गाविअ भदिअ णिवेदइस्सं । [देव ! एतद्विज्ञाप्यते—न केवलं देव्या नियोगेन तस्या अनुगताऽस्मि, तारामैत्र्यापि सखीत्वं प्राप्ता कर्पूरमञ्जर्याः । तेन तत्कार्यासक्ताऽहं पुनरपि सेवकीभूय निवेदयिष्यामि]—

तिस्सा दाव परिक्खणाअ णिहिदो हत्थो थणोत्थंगदो
दांहुड्डामरिदो सहीहि बहुसो हेलाअ कड्ढिज्जइ ।

यस्मिन् सकलगुणगणः सर्वाङ्गसङ्गः स अदम्भः अलभ्यः तस्मिन् परमसुखकरे काले (विदग्धाः) कामपि नेपथ्यलक्ष्मीम् न इच्छन्ति ।

व्याख्या—कृत्रिमेण बाह्येन विरचनविधिना अलङ्करणविधानेन किं कार्यम् प्रयोजनम्, न किमपीत्यर्थः, सः कृत्रिमविरचनविधिः नटीनां वेश्यानां विडम्बः प्रतारणम्, मुग्धान् वञ्चयितुमेव वेश्याः कृत्रिमप्रसाधनैः स्वाङ्गं विभूषयन्ति । यत् निजांगं जनानां मनसः चित्तस्य आह्लादकं तेन अङ्गेन सीमन्तिन्यः कुलाङ्गनाः सौंदर्यं धारयन्ति । यस्मिन् सकलगुणानां शीलसौन्दर्यादीनां गणः सर्वेषु अङ्गेषु सज्जति स कालः अदम्भः स्वाभाविकः अलभ्यः अप्राप्यश्च भवति, तस्मिन् परमसुखकरे अत्यन्तानन्दवर्धके काले यौवने विदग्धाः कामपि नेपथ्यलक्ष्मीं प्रसाधनशोभां नेच्छन्ति न अपेक्षन्ते । युवावस्थायां विदग्धाः न कामपि वेषभूषाजनितश्रियं वाञ्छन्ति, तदा तु स्वत एव सीमन्तिन्यः मनोहराः भवन्ति ॥ २८ ॥

और सौन्दर्य इत्यादि स्वाभाविक रूप से समग्र शरीरावयवों में जिस समय पाए जाते हैं वह यौवनकाल दुर्लभ होता है, परम सुखदायक उस यौवनकाल में विदग्ध जन किसी शृङ्गार की आवश्यकता नहीं समझते । युवावस्था में बिना शृङ्गार के ही शरीर सुन्दर रहता है।।२८।।

विचक्षणा—महाराज ! केवल महारानी के आदेश से ही मैं कर्पूरमञ्जरी के साथ नहीं रहती हूँ, बल्कि मेरा कर्पूरमञ्जरी से स्वाभाविक प्रेम भी हो गया है । इसलिए उसके कार्य में लगे होने पर भी सेवक रूप से मैं कुछ निवेदन करती हूँ—

शब्द से मत्वर्थीय इन् प्रत्यय, स्त्रीलिङ्ग का ई प्रत्यय-सीमन्तिनी । सर्वेषु अंगेषु सज्जति सर्वाङ्गसङ्गः = सर्वाङ्गव्यापी । अदम्भः = दम्भरहित-नैसर्गिक । नेपथ्यलक्ष्मी = वेशरचना की शोभा ।। २८ ।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

टिप्पणी—तारामैत्री = एक दूसरे को देखने से उत्पन्न स्वाभाविक प्रेम । सेवकीभूय

किं तेणावि इमं णिसामअ गिरं संतोसिणिं तासिणिं
हत्थच्छत्तणिवारिदेंदुकिरणा बोलेइ सा जामिणि ॥ २९ ॥
[तस्यास्तावत्परीक्षणाय निहितो हस्तः स्तनोत्सङ्गतो
दाहोड्डामरितः सखीभिर्बहुशो हेलया कृष्यते ।
किं तेनापीमां निशामय गिरं सन्तोषिणीं त्रासिनीं
हस्तच्छत्रनिवारितेन्दुकिरणाऽतिवाहयति सा यामिनीम् ॥ २९ ॥]

अन्वयः—तस्याः तावत् परीक्षणाय सखीभिः स्तनोत्संगतः निहितः हस्तः दाहोड्डामरितः बहुशः हेलया कृष्यते । किं तेन अपि, इमाम् सन्तोंणिषीं त्रासिनीं गिरम् निशामय । सा हस्तच्छत्रनिवारितेन्दुकिरणा यामिनीम् अतिवाहयति ।

व्याख्या—तस्याः कर्पूरमञ्जर्याः तावत् साकल्येन सम्यग्वा परीक्षणाय किंनिमित्तः कीदृशश्चास्याः सन्ताप इति निश्चयाय सखीभिः स्तनयोः उत्सङ्गतः समीपात् निहितः अर्पितः हस्तः दाहोड्डामरितः सन्तापेन भृशमुत्तापितः बहुशः पुनः पुनः हेलया अवज्ञया कृष्यते अपनीयते इति भावः । यदि एतेनापि तस्याः सन्तापः सम्यग् न ज्ञायते तदा इमाम् सन्तोषिणीं सन्तोषजनिकां त्रासिनीं त्रासोत्पादिकां

सखियों के द्वारा कर्पूरमञ्जरी के सन्ताप के कारण और स्वरूप को पूर्णतया जानने के लिए उसके स्तनों पर रखा हुआ हाथ अत्यन्त गरम लगने पर बार बार हटा लिया जाता है। यदि इससे भी उसका सन्ताप ठीक न जाना जाय, तो सन्तोष और डर उत्पन्न करने वाली यह बात सुनिए। हाथ के छत्र से ही चन्द्रमा की किरणों को बचाती हुई वह किसी तरह रात काटती है। 'कर्पूरमञ्जरी महाराज से प्रेम करती है' यह बात तो महाराज को सन्तोष पहुँचाती है लेकिन चन्द्रमा की किरणों तक से अपने को बचाने का समाचार डर उत्पन्न करता है ॥ २९ ॥

असेवकः सेवकः भवति इति सेवकीभवति (च्विप्रत्ययान्त) √सेवकीभू + य (ल्यबन्त) सेवक होकर । नि √वेदि + इ + ष्यामि = निवेदयिष्यामि = निवेदन करूँगी ।

टिप्पणी—निहितः = रखा हुआ—नि √धा + त = निहित—धा धातु को ही आदेश, क्तप्रत्यय । दाहेन उड्डामरितः = दाहोड्डामरितः = सन्तापेन भृशमुत्तापितः हेला = खेल अवज्ञा । कृष्यते = हटा लिया जाता है √कृष् + य + ते (कर्मवाच्य वर्तमान) । निशामय = सुनिए—नि √शामि + अ = निशामय—लोट् मध्यमपुरुष का एकवचन । 'सन्तुष्यति' इति या सा सन्तोषिणी = सन्तोष देने वाली—सम् √तुष् + इन् + ई = सन्तोषिणी (णिनि प्रत्यय, स्त्रीलिङ्ग का ई प्रत्यय) । हस्त एव छत्रम् = हस्तच्छत्रं तेन निवारिताः इन्दुकिरणाः यया सा हस्तच्छत्रनिवारितेन्दुकिरणा = करातपत्राच्छादितचन्द्रमयूखा—हाथ से ही चन्द्रमा की किरणों को बचाती हुई । यामिनी = रात्रि । अतिवाहयति = बिताती है ॥ २९ ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कज्जसेसं कविञ्जलो णिवेदइस्सदि, तं च देवेण तधा कादव्वं [कार्यशेषं कपिञ्जलो निवेदयिष्यति, तच्च देवेन तथा कर्त्तव्यम्]

(इति परिक्रम्य निष्क्रान्ता)

राजा—वअस्स । किं उण तं कज्जसेसं ? । [वयस्य ! किं पुनस्तत् कार्यशेषम् ?]

विदूषकः—अज्ज हिंदोलणचउत्थी, तहिं देवीए गोरिं कदुअ कप्पूरमञ्जरीं हिंदोलए आरोञ्जइदव्वा । ता मरगअकुञ्जट्ठिदेण देवेण कप्पूरमञ्जरीं हिंदोलन्ती दट्ठव्वा; एदं तं कज्जसेसं । [अद्य हिन्दोलनचतुर्थी, तत्र देव्या गौरीं कृत्वा कर्पूरमञ्जरी हिन्दोलके आरोहयितव्या । तन्मरकतकुञ्जस्थितेन देवेन कर्पूरमञ्जरी हिन्दोलन्ती द्रष्टव्या; एतत्तत् कार्यशेषम्]

राजा—(विचिन्त्य) ता अदिणिउणा वि छलिदा देवी । [तदतिनिपुणाऽपि छलिता देवी]

विदूषकः—पाइआ जिण्णमज्जारिआ दुद्धं त्ति तक्कं । [पायिता जीर्णमार्जारिका दुग्धमिति तक्रम् ।]

गिरं वाणीं शृणु । हस्तच्छत्रेण चन्द्रमयूखान् निवारितवती सा यथाकथंचित् यामिनीम् अतिवाहयति यापयति । 'सा देवे अनुरक्ता' इति प्रतिपादकत्वेन इयं वाक् देवस्य सन्तोषकरी, 'चन्द्रकिरणा अपि दुःसहतापमुत्पादयन्ति, विलम्बोऽसह्यः' इतीयं वाणी भयमुत्पादयति अनिष्टाशंकया ॥ २९ ॥

बाकी काम कपिञ्जल बतलायगा, उसे भी महाराज उसके अनुसार करें ।

(यह कहकर घूमकर बाहर चली जाती है)

राजा—मित्र ! वह बाकी काम क्या है ?

विदूषक—आज हिंडोला झूलने की चतुर्थी है, महारानी गौरी की पूजा कर कर्पूरमञ्जरी को हिंडोले में झुलायेंगी, आप मरकतकुञ्ज नामक प्रसाद में बैठकर कर्पूरमञ्जरी को झूला झूलते हुये देखें । यही काम बाकी है ।

राजा—(कुछ सोचकर) अत्यन्त चतुर महारानी को भी हम लोगों ने धोखा दे दिया ।

विदूषक—बूढ़ी बिल्ली को दूध के नाम से मट्ठा पिला दिया ।

टिप्पणी—आरोहयितव्या = चढ़ानी चाहिए—आ√रोहि + इ + तव्या = आरोहयितव्या (तव्य प्रत्ययान्त) हिन्दोलकम् = हिंडोला ।

टिप्पणी—पायिता = पिलाया√पायि + त + अ । ण्यन्त पा धातु से कर्मवाच्य में क्त प्रत्यय । जीर्णमार्जारिका = बूढ़ी बिल्ली ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

राजा—को अण्णो तुम्हाहिंतो मह कज्जसज्जो ? को अण्णो चन्दाहितो समुद्दवड्ढणणिट्ठो ?। [कोऽन्यो युष्मत्तो मम कार्यसज्जः ? कोऽन्यश्चन्दतः समुद्रवर्द्धननिष्ठः ? ।]

(इति परिक्रम्य कदलीगृहप्रवेशं नाटयतः)

विदूषकः—इअं उत्तुंगफलिहमणिवेदिआ, ता इह उवविसदु पिअवअस्सो। [इयमुत्तुङ्गस्फटिकमणिवेदिका, तदिहोपविशतु प्रियवयस्यः ।]

(राजा तथा करोति)

विदूषकः—(हस्तमुद्यम्य) भो ! दीसदु पुण्णिमाचन्दो ! [भोः दृश्यतां पूर्णिमाचन्द्रः !]

राजा—(विलोक्य) अए ! दोलारूढाए मह वल्लहाए वअणं पुण्णिमाचन्दो त्ति णिद्दिससि [अये दोलारूढाया मम वल्लभाया वदनं पूर्णिमाचन्द्र इति निर्दिशसि] (समन्तादवलोक्य)—

विच्छाअन्तो णअररमणीमण्डलस्साणणाइं
पच्छालन्तो गअणकुहरं कन्तिजोण्हाजलेण।
पेच्छन्तीणं हिअअणिहिअं णिद्दलन्तो अ दप्पं
दोलालीलासरलतरलो· दीसए से मुहेन्दू ॥ ३० ॥

राजा—तुम्हारे अतिरिक्त और कौन मेरे कार्य में इतना तत्पर हो सकता है ? चन्द्रमा के अतिरिक्त और कौन समुद्र को बढ़ाने का काम कर सकता हैं ?

(इसके बाद दोनों घूमकर कदलीगृह में प्रवेश करने का अभिनय करते हैं)

विदूषक—यह स्फटिक मणि का ऊँचा चबूतरा है, मित्र ! यहाँ बैठो।

(राजा बैठता है)

विदूषक—(हाथ उठाकर) महाराज ! पूर्णिमा का चन्द्रमा देखिये।

राजा—(देखकर) अरे ! हिंडोले पर बैठी हुई मेरी प्रेमिका के मुख को पूर्णिमा का चन्द्र बतलाता है। (चारों ओर देखकर)—

टिप्पणी—युष्मत्तः = तुमसे भिन्न = अन्य योग में पञ्चमी। कार्ये सज्जः कार्यसज्जा = कार्य में लगा हुआ। समुद्रस्य वर्धने निष्ठा यस्य स समुद्रवर्धननिष्ठः = समुद्राह्लादनतत्परः।

टिप्पणी—स्फटिकमणीनां वेदिका स्फटिकमणिवेदिका—उत्तुङ्गा चासौ स्फटिकमणिवेदिका = उत्तुङ्गस्फटिकमणिवेदिका = स्फटिकमणि का ऊँचा चबूतरा। स्फटिक = सफेद पत्थर। वेदिका चबूतरा।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

[विच्छाययन्नगररमणीमण्डलस्याननानि
प्रक्षालयन् गगनकुहरं कान्तिज्योत्स्नाजलेन ।
प्रेक्षमाणानां हृदयनिहितं निर्दलयंश्च दर्पं
दोलालीलासरलतरलो दृश्यतेऽस्या मुखेन्दुः ॥ ३० ॥

अवि अ [अपि च]—

उच्चेहिं गोउरेहिं धवलधअवटाडम्बरिल्लावलीहिं
घण्टाहिं विन्दुरिल्लासुरतरुणिविमाणाणुरूवं वहन्ती ।
पाकारं लङ्घअन्ती कुणइ रअवसा उण्णमन्ती णमन्ती
एन्ती जन्ती अ दोला जणमणहरणं कट्टनुकट्टणेहिं ॥ ३१ ॥

अन्वयः—अस्याः मुखेन्दुः नगररमणीमण्डलस्य आननानि विच्छाययन् कान्तिज्योत्स्नाजलेन गगनकुहरम् प्रक्षालयन् प्रेक्षमाणानाम् हृदयनिहितम् दर्पम् निर्दलयन् दोलालीलासरलतरलः दृश्यते ।

व्याख्या—अस्याः कर्पूरमञ्जर्याः मुखेन्दुः मुखचन्द्रः नगररमणीमण्डलस्य नगरकामिनीसंघस्य आननानि मुखानि विच्छाययन् विच्छायानि विगतकान्तीनि कुर्वन् दृश्यते । अस्याः मुखचन्द्रः स्वकान्तिरूपायाः ज्योत्स्नायाः चन्द्रिकायाः जलेन गगनकुहरम् अन्तरिक्षविवरम् प्रक्षालयन् धवलयन् प्रकाशयन् वा दृश्यते । कर्पूरमंजरीं पश्यतां पश्यन्तीनां च नराणां नारीणां च 'ममैव भार्या सुन्दरी नान्या, अहमेव सुन्दरी नान्येति वा हृदयस्थं दर्पमभिमानं निर्दलयन् निरसन्, उन्मूलयन् वा अस्याः मुखचन्द्रः दोलायाः लीलया सरलतरलः संनिकृष्टविप्रकृष्टश्च दृश्यते । यदा दोला सन्मुखमायाति तदा सन्निकृष्टं समीपं दृश्यते, यदा पृष्ठतः गच्छति तदा दूरमिति भावः ॥ ३० ॥

कर्पूरमञ्जरी का चन्द्रमा के समान सुन्दर मुख नगर की समस्त स्त्रियों के मुखों को अपने सौन्दर्य से मलिन करता हुआ, कान्तिरूपी चांदनी के विस्तार से आकाश को उज्ज्वल करता हुआ तथा देखने वाले पुरुषों और स्त्रियों के हृदय के (अपनी प्रेयसियों तथा अपने सौन्दर्य सम्बन्धी) गर्व को चूर करता हुआ झूले के आने जाने से पास तथा दूर दिखाई पड़ता है ॥ ३० ॥

और भी—

टिप्पणी—विगता छाया यस्य तत् विच्छायम्—विच्छायं करोति = विच्छाययति (नामधातुण्यन्त) विच्छाययतीति विच्छाययन् (शत्रन्त) मलिनीकुर्वन् = मलिन करता हुआ । प्रक्षालयन् = उज्ज्वल बनाता हुआ प्र√क्षालि+अन् (शत्रन्त) । निर्दलयन् =

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

[उच्चेषु गोपुरेषु धवलध्वजपटाडम्बरबहलावलीषु
घण्टाभिर्विद्राणसुरतरुणिविमानानुरूपं वहन्ती ।
प्राकारं लङ्घयन्ती करोति रयवशादुन्नमन्ती नमन्ती
आयान्ती यान्ती च दोला जनमनोहरणं कर्षणोत्कर्षणैः ।। ३१ ।।]

अवि अ [अपि च]—

रणन्तमणिणेउरं झगझगंतहारच्छडं
कलक्कणिदकिङ्किणीमुहरमेहलाडम्बरं ।
विलोलवलआवलीजणिदमञ्जुसिञ्जारवं
ण कस्स मणमोहणं ससिमुहीअ हिन्दोलणं ? ।। ३२ ।।

अन्वय.—धवलध्वजपटाडम्बरबहलावलीषु उच्चेषु गोपुरेषु घण्टाभिः विद्राण-सुरतरुणिविमानानुरूपम् वहन्ती प्राकारं लङ्घयन्ती रयवशात् उन्नमन्ती नमन्ती कर्षणोत्कर्षणैः आयान्ती यान्ती दोला जनमनोहरणम् करोति ।

व्याख्या—धवलानां श्वेतानां ध्वजपटानां ये आडम्बराः विस्ताराः तैः बहलाः पूर्णाः आवल्यः येषु तादृशेषु उच्चेषु गोपुरेषु पुरद्वारेषु घण्टाभिः घण्टारवैः विद्राणं वेगेन गच्छत् यत् सुरतरुणीनां विमानम् तदनुरूपं वहन्ती चलन्ती, प्राकारं प्राचीरं लङ्घयन्ती अतिक्रामन्ती, तथा रयवशात् वेगहेतोः उन्नमन्ती ऊर्ध्वं गच्छन्ती, नमन्ती अधोभवन्ती, कर्षणोत्कर्षणैः आकर्षणेन त्यागेन च आयान्ती आगच्छन्ती समीपमिति यावत्, यान्ती दूरं गच्छन्ती दोला जनानां मनांसि हरति ।। ३१ ।।

श्वेत ध्वजाओं की पङ्क्तियों से युक्त ऊँचे गोपुरों में घण्टे के शब्द से शीघ्र जाते हुए देवाङ्गनाओं के विमान की तरह चलता हुआ, चहारदीवारी को भी लाङ्घने वाला, वेग से ऊपर और नीचे जाता हुआ, तथा खींचने और छोड़ देने से पास आता और जाता हुआ यह झूला लोगों के मन को अपनी ओर आकृष्ट करता है । ३१ ।।

चूर करता हुआ (शत्रन्त) दृश्यन्ते = दिखाई पड़ता है (√दृश + य + ते—कर्मवाच्य लट्-वर्तमान) मुखेनेव इन्दुः मुखेन्दुः = मुखचन्द्रः (उपमानसमास) ।। ३० ।।

गोपुर = नगर का द्वार । धवलाश्च ते ध्वजपटाः = धवलध्वजपटाः, तेषां ये आडम्बराः विस्ताराः, तैः बहलाः पूर्णाः आवल्यः पङ्क्तयः येषु तेषु धवलध्वजपटाडम्बरबहलावलीषु = श्वेतध्वजपटविस्तारपूर्णपङ्क्तिषु । विद्राणं वेगेषु गच्छत यत् सुरतरुणिविमानम् = विद्राण-सुरतरुणिविमानं तस्यानुरूपम् = विद्राणसुरतरुणिविमानानुरूपम् । प्राकार=प्राचीर, चाहार-दीवारी । लङ्घयन्ती = √लङ्घ + ... (शत्रन्त, स्त्रीप्रत्ययान्त) कर्षण = खींचना । उत्कर्षण = छोड़ना । विद्राण = वि√द्रा + त = विद्राण क्त प्रत्यय का त न हो गया ।। ३१ ।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

[रणन्मणिनूपुरंझणझणायमानहारच्छटं
कलक्वणितकिङ्किणीमुखरमेखलाडम्बरम् ।
विलोलवलयावलीजनितमञ्जुशिञ्जारवं
न कस्य मनोमोहनं शशिमुख्या हिन्दोलनम् ? ॥ ३२ ॥]

विदूषकः—भो ! सुत्तआरो तुमं। अहं उण वित्तिआरो भविअ वित्थरेण वण्णेमि। [**भो ! सूत्रकारस्त्वम्। अहं पुनर्वृत्तिकारो भूत्वा विस्तरेण वर्णयामि**]-

उवरिट्ठिअथणपब्भारपीडिअं चरणपंकजजुअं से।
फक्कारइव्व भअणं रणंतमणिणेउररवेण ॥ ३३ ॥

अन्वयः—रणन्मणिनूपुरम् झणझणायमानहारच्छटम् कलक्वणितकिङ्किणी मुखरमेखलाडम्बरम् विलोलवलयावलीजनितमञ्जुशिञ्जारवम् शशिमुख्याः हिन्दोलनं कस्य मनोमोहनं न।

व्याख्या—रणन्तौ ध्वनन्तौ मणिनूपुरौ यस्मिन् तादृशं शब्दायमाननूपुर-संयुक्तं झणझणायमानया हारच्छटया च मिश्रितम्, कलं मधुरं क्वणन्त्यः याः किङ्किण्यः क्षुद्रघण्टिकाः ताभिः मुखरः यः मेखलायाः रशनायाः आडम्बरः तेन संयुक्तम्, विलोलाभिः चपलाभिः वलयावलीभिः उत्पन्नः यः मञ्जुः मनोहरः शिञ्जारवः, तेन च युक्तम् चन्द्रवदनायाः कर्पूरमञ्जर्या हिन्दोलनं कस्य मनो न मोहयति, अपितु सर्वस्यैवेति भावः। यदा कर्पूरमञ्जरी हिन्दोलति, तदा यस्याः नूपुरौ शब्दं कुरुतः, हारच्छटा च झणझणायते, मेखलायां च याः क्षुद्रघण्टिकाः ताः मधुरं कूजन्ति, तस्याः कङ्कणानि च मञ्जुशिञ्जारवं कुर्वन्ति। एतादृशं तस्याः हिन्दोलनं कस्य मनः नाह्लादयति, अपि तु सर्वस्यैव ॥ ३२ ॥

और भी—

मणिनूपुरों की झङ्कार से युक्त, हारावली के झन् झन् शब्द से पूर्ण, करधनी की छोटी २ घण्टियों के मधुर शब्द से भरा हुआ तथा चञ्चल कङ्कणों से उत्पन्न मधुर शब्द वाला यह चन्द्रमुखी कर्पूरमञ्जरी का झूलना किसके मन को अच्छा नहीं लगता ? ॥ ३२ ॥

विदूषक—मित्र ! तुम तो सूत्रकार हो—अर्थात् संक्षेप में बोलते हो, मैं वृत्तिकार के रूप में विस्तारपूर्वक वर्णन करूँगा।

टिप्पणी—हिन्दोलनम् = झूला झूलना। मनसः मोहनम् = मनोमोहनम्—मन को मुग्ध करने वाला ॥ ३२ ॥

टिप्पणी—सूत्रं करोतीति सूत्रकारः—कर्म में अण् प्रत्यय। सूत्रलक्षण—स्वल्पाक्षरम-संदिग्धं सारवद्विश्वतो मुखम्। अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः ॥ वृत्ति = टीका ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

[उपरिस्थितस्तनप्राग्भारपीडितं चरणपङ्कजयुगं तस्याः ।
फूत्कारयतीव मदनं रणन्मणिनूपुररवेण ॥ ३ ॥]
हिन्दोलणलीलाललणलंपडं चक्कवत्तुलं रमणं ।
किलकिलइ व्व सहरिसं काञ्चीमणिकिङ्किणिरवेण ॥ ३४ ॥
[हिन्दोलनलीलाललनलम्पटं चक्रवर्त्तुलं रमणम् ।
किलकिलायतीव सहर्षं काञ्चीमणिकिङ्किणीरवेण ॥ ३४ ॥]
दोलांदोलणलीलासरंतसरिआच्छलेण से हारो ।
वित्थारइ व्व कुसुमाउहरणवइणो कित्तिवल्लीओ ॥ ३५ ॥
[दोलान्दोलनलीलासरत्सरिकाच्छलेनास्या हारः ।
विस्तारयतीव कुसुमायुधनरपतेः कीर्तिवल्लीः ॥ ३५ ॥]

व्याख्या—उपरिस्थितेत्यादि-तस्याः कर्पूरमञ्जर्याः चरणपङ्कजयुगम् पादपद्म-युगलम्, उपरिस्थितयोः स्तनयोः प्राग्भारेण पीडितं भाराक्रान्तं सत्, रणन्तौ यौ मणिनूपुरौ तयोः रवेण मदनम् कामदेवं फूत्कारयतीव आह्वयतीव । कर्पूरमञ्जर्याः मणिनूपुराणां शब्दमात्रमेव श्रुत्वा कामिनां मदनावेशः जायते । अत्रोत्प्रेक्षालङ्कारः । फूत्कारयति=फूत्कारं करोति । फूत्कार शब्द से णिच् √फूत्कारि + अ + ति ॥३३॥

अन्वयः—हिन्दोलनलीलाललनलम्पटं चक्रवर्तुलम् रमणम् काञ्चीमणिकिङ्कि-णीरवेण सहर्षम् किलकिलायति इव ।

व्याख्या—हिन्दोलनस्य या लीला तस्याः ललने लम्पटं हिन्दोलनविलास-प्रसरणलुब्धम् चक्रवत् वर्तुलं गोलाकारम् रमणम् नितम्बस्थलम् काञ्ची रशना तत्र स्थिताः याः मणिकिङ्किण्यः मणिमयक्षुद्रघटिकाः तासां रवेण सहर्षं प्रसादपूर्वकम् किलकिलेति शब्दं करोति । यदा कर्पूरमञ्जरी हिन्दोलते, तदा यस्याः नितम्बो-परि स्थिरा काञ्चीकिङ्किण्यः किलकिलेति गुञ्जन्ति ॥ ३४ ॥

अन्वय.—अस्याः हारः दोलान्दोलनलीलासरत्सरिकाच्छलेन कुसुमायुधन-रपतेः कीर्तिवल्लीः विस्तारयति इव ।

कर्पूरमञ्जरी के चरण कमल, ऊपर उठे हुए स्तनों के उभार से दब कर मणिनूपुरों के शब्द द्वारा कामदेव को बुलाते हुए से लगते हैं ॥ ३३ ॥

हिंडोले की लीला के साथ लीला (खेलने) करने के लालची और चक्र की तरह गोल कर्पूरमञ्जरी के नितम्ब करधनी में लगी हुई रत्नों की छोटी २ घण्टियों के शब्द द्वारा हर्ष के साथ मानों किलकिलाते हैं ॥ ३४ ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

संमुहपवणप्पेरिदोवरिवत्थे दरदस्सिदाइँ अंगाइं ।
हक्कारिऊण मअणं पासम्मि णिवेसअंति व्व ॥ ३६ ॥
[सम्मुखपवनप्रेरितोपरिवस्त्रे दरदर्शितान्यङ्गानि ।
आकार्य्य मदनं पार्श्वे निवेशयन्तीव ॥ ३६ ॥]
ताडंकजुअं गण्डेसु बहलघुसिणेसु घडणलीलाहिं ।
देइ व्व दोलान्दोलणरेहाओ गणणकोदुएण ॥ ३७ ॥
[ताटङ्कयुगं गण्डयोर्बहलघुसृणयोर्घटनलीलाभिः ।
ददातीव दोलान्दोलनरेखा गणनकौतुकेन ॥ ३७ ॥]

व्याख्या—अस्याः कर्पूरमञ्जर्याः हारः दोलायाः आन्दोलनलीला तस्यां सरन्ती चलन्ती या सरिका मुक्तावली तस्याः छलेन कामदेवभूपतेः कीर्तिवल्लीः कीर्तिलताः कीर्तिपरम्पराः विस्तारयति प्रसारयतीवेत्यर्थः । यदा कर्पूरमञ्जरी हिन्दोलते तदा दोलान्दोलनानुसारं तस्याः हारस्य मुक्तावली अपि चलति । एतद् दृष्ट्वा इदं प्रतिभाति तत् हारः कामदेवस्य कीर्ति प्रसारयन्नास्ते ॥ ३५ ॥

अन्वयः—सम्मुखपवनप्रेरितोपरिवस्त्रे दरदर्शितानि अङ्गानि, मदनम् आकार्य पार्श्वे निवेशयन्ति इव ।

व्याख्या—सम्मुखेन सन्मुखादागतेन पवनेन वायुना प्रेरितं सञ्चालितं यत् उपरिवस्त्रं तस्मिन् दरदर्शितानि ईषदुद्घाटितानि अङ्गानि ऊरुप्रभृतीनि मदनमनङ्गम् आकार्य आहूय पार्श्वे समीपे निवेशयन्ति इव दृश्यन्ते । पवनेन वस्त्राणां सञ्चालने ईषदुन्मिषितानामूर्वादीनां दर्शनादेव कामिनां कामोद्रेकः सञ्जायते । अत्रोत्प्रेक्षालङ्कारः ॥ ३६ ॥

अन्वयः—ताटङ्कयुगम् बहलघुसृणयोः गण्डयोः घटनलीलाभिः गणनकौतुकेन दोलान्दोलनरेखाः ददाति इव ।

झूले चलने के साथ चलती हुई मुक्तावली के द्वारा कर्पूरमञ्जरी का हार कामदेवरूपी राजा की कीर्तिपरम्परा को फैलाता सा है ॥ ३५ ॥

सामने से आती हुई हवा के द्वारा ऊपर के वस्त्र के हट जाने पर कुछ २ दिखाई देती हुई इसकी जङ्घाएँ कामदेव को बुला कर पास बैठाती हुई सी दिखाई देती हैं ॥ ३६ ॥

कर्पूरमञ्जरी के कानों में पड़े हुये ताटङ्क उसके कुङ्कुम लगे हुये कपोलों पर बार २ लगने से ऐसे मालूम देते हैं जैसे झूला झूलने की गिनती करने के लिए रेखाएँ लगाते हों ॥

टिप्पणी—घुसृण = कुङ्कुम । ताटङ्क = कान का गहना । कितने बार यह झूलती है यह गिनने के लिये ताटङ्क उसके गालों पर रेखायें सी बनाते हैं ॥ ३७ ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

णअणाइं पसिदिसरिसाइं झत्ति फुल्लाइँ कोदुहल्लेण।
अप्पेन्ति व्व कुवलआसलीमुहे पञ्चबाणस्स ॥ ३८ ॥
[नयने प्रसृतिसदृशे झटिति फुल्ले कौतूहलेन।
अर्प्यंते इव कुवलयशिलीमुखे पञ्चबाणस्य ॥ ३८ ॥]
दोलारअविच्छेओ कहं पि मा होउ त्ति पडइ व्व।
पुट्ठम्मि वेणिदंडी मम्महचम्मजट्ठिआअंतो ॥ ३९ ॥
[दोलारसविच्छेदः कथमपि मा भवत्विति पततीव।
पृष्ठे वेणीदण्डो मन्मथचर्मयष्टिकायमानः ॥ ३९ ॥]
इअ एआइँ विलासुज्जलाइँ दोलापवञ्चचरिआइं।
कस्स ण लिहेइ चित्ते णिउणो कन्दप्पचित्तअरो ॥ ४० ॥

व्याख्या—कर्पूरमञ्जर्याः ताटङ्कयुगम् कर्णभूषणयुगलम् बहलं घुसृणं ययोः तयोः प्रभूतकुङ्कुमरागवतोः गण्डयोः कपोलयोः घटनलीलाभिः घर्षणविलासैः गणनकौतुकेन कति वारान् हिन्दोल्यते इति संख्याकरणकुतूहलेन दोलाया आन्दोलनस्य रेखाः चिह्नविशेषान् ददातीव ॥ ३७ ॥

अन्वयः—प्रसृतिसदृशे नयने झटिति कौतूहलेन फुल्ले पञ्चबाणस्य कुवलयशिलीमुखे अर्प्यंते इव।

व्याख्या—प्रसृतिसदृशे अर्धाञ्जलिपरिमिते अतिदीर्घे कर्पूरमञ्जर्याः नयने कौतूहलेन झटिति सहसा फुल्ले विकासं गते। तस्याः नेत्रे दृष्ट्वा एतत् प्रतीयते यत् कामदेवेन कामिनां मनस आघाताय स्वनीलकमलरूपिणौ बाणौ संधत्तौ तस्याः नेत्रे नीलकमलोपमौ कामिनां मनांसि च संहरन्ति ॥ ३८ ॥

अन्वयः—दोलारसविच्छेदः कथमपि मा भवतु इति मन्मथचर्मयष्टिकायमानः वेणीदण्डः पृष्ठे पतति इव।

व्याख्या—दोलारसस्य दोलनव्यापारस्य विच्छेदः विरामः कथमपि न भवेदित्यर्थं मन्मथस्य कामस्य चर्मयष्टिकायमानः चर्मनिर्मिता यष्टिरिव आचरन् वेणीदण्डः वेणीकृतकेशयष्टिः पृष्ठे पतति इव आघातं करोतीव ॥ ३९ ॥

कर्पूरमञ्जरी की बड़ी २ आंखें कुतूहल में एकाएक खुली हुई ऐसी लगती हैं मानों कामदेव ने नीलकमलरूपी बाण कामिपुरुषों के मन पर छोड़ दिये हों ॥ ३८ ॥

झूलने में किसी तरह कमी न आये—इस विचार से कर्पूरमञ्जरी की वेणी कामदेव की चर्मनिर्मित कशा की तरह उसकी पीठ पर पड़ती है ॥ ३९ ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

[इत्येतानि विलासोज्ज्वलानि दोलाप्रपञ्चचरितानि !

कस्य न लिखति चित्ते निपुणः कन्दर्पचित्रकरः ? ।। ४० ।।]

राजा—(सविषादम्) कधमवदिण्णा कप्पूरमञ्जरी ! रित्ता दोला, रित्तं अ मह चित्तं, रित्ताइं दंसणुस्सुआइं मह णअणाइं। [कथमवतीर्णा कर्पूरमञ्जरी ! रिक्ता दोला, रिक्तं च मम चित्तं, रिक्ते दर्शनोत्सुके मम नयने ।]

विदूषकः—ता विज्जुल्लेहा विअ खणदिट्ठणट्ठा । [तद्विद्युल्लेखेव क्षण-दृष्टनष्टा ।]

राजा—मा एवं भण; हरिअंदपुरी विअ दिट्ठा पणट्ठा अ । [मैवं भण, हरिश्चन्द्रपुरीव दृष्टा प्रनष्टा च ।] (स्मृतिनाटितकेन)—

अन्वयः—निपुणः कन्दर्पचित्रकरः इत्येतानि विलासोज्ज्वलानि दोलाप्रपञ्च-चरितानि कस्य चित्ते न लिखति ।

व्याख्या—निपुणः कुशलः कन्दर्प एव चित्रकारः आलेख्यकरः इत्येतानि पूर्वोक्तानि विलासेन उज्ज्वलानि विचित्राणि दोलाप्रपञ्चचरितानि दोलान्दोलन-विस्तृतचरित्राणि कस्य जनस्य चित्ते हृदयपटले न लिखति न चित्रयति । अपि तु सर्वस्यैव कामिनः चित्रे इमानि चित्राणि कन्दर्पेण आलिख्यन्ते ।। ४० ।।

कामदेवरूपी चतुर चित्रकार ऊपर वर्णन किए गए विलास से पूर्ण झूला झूलने के विस्तृत चित्रों को किसके हृदय पर चित्रित नहीं करता है ? ।। ४० ।।

राजा—(दुःख के साथ) अरे, कर्पूरमञ्जरी तो उतर पड़ी ? झूला खाली हो गया, मेरा मन भी खाली हो गया और उसको देखने के लिए लालायित मेरी आँखें भी खाली हो गईं !!

विदूषक—वह बिजली की चमक की तरह कभी दिखाई देती है कभी छिप जाती है ।

राजा—ऐसा मत कहो, हरिश्चन्द्र की नगरी की तरह दिखाई दी और नष्ट हो गई। (स्मृति का अभिनय कर) :—

टिप्पणी—कर्पूरमञ्जरी के झूला झूलने का यह विस्तृत वर्णन (३०–४० श्लो०) विदूषक का किया हुआ है । राजा ने केवल सूत्ररूप में (संक्षेप में) वर्णन किया था । विदूषक ने उसकी यह वृत्ति (विशद व्याख्या) कर दी ।। ४० ।।

टिप्पणी—हरिश्चन्द्रपुरीव—राजा हरिचन्द्र की नगरी निरन्तर उत्सवों से पूर्ण रहने के कारण लोगों को आनन्द देती रहती थी बाद में विश्वामित्र ऋषि ने अपने पराक्रम से उसे छीन कर नष्ट कर दिया—इसी तरह कर्पूरमञ्जरी को हरिश्चन्द्र की उपमा दी गई है ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मञ्जिट्ठो ओट्ठमुद्दा णवघडणसुवण्णुज्जला अङ्गजट्ठी
दिट्ठी बालेन्दुलेहाधवलिमजइणी कुन्तला कज्जलाहा।
इत्थं वण्णाणं रेहा बिहरइ हरिणीचञ्चलच्छी अ एसा
कन्दप्पो दीहदप्पो जुअजणजअणे पुण्णलक्खो व्व भादि ॥ ४१ ॥

[माञ्जिष्ठी ओष्ठमुद्रा नवघटनसुवर्णोज्ज्वलाऽङ्गयष्टिः
दृष्टिर्वालेन्दुरेखाधवलिमजयिनी कुन्तलाः कज्जलाभाः।
इत्थं वर्णानां रेखा विहरति हरिणीचञ्चलाक्षी चैषा
कन्दर्पो दीर्घदर्पे युवजनजये पूर्णलक्ष्य इव भाति ॥ ४१ ॥]

अन्वयः—ओष्ठमुद्रा माञ्जिष्ठी, अङ्गयष्टिः नवघटनसुवर्णोज्ज्वला, दृष्टिः बालेन्दुरेखाधवलिमजयिनी, कुन्तलाः कज्जलाभाः, इत्थं वर्णानां रेखा विहरति, एषा च हरिणीचञ्चलाक्षी, दीर्घदर्पः कन्दर्पः युवजनजये पूर्णलक्ष्य इव भाति।

व्याख्या—कर्पूरमञ्जर्याः ओष्ठमुद्रा ओष्ठावयवः माञ्जिष्ठी मञ्जिष्ठारागरक्ता, अङ्गयष्टिः तनुलता नवसुवर्णमिव उज्ज्वला, दृष्टिः बालाया अभिनवायाः इन्दुरेखायाः चन्द्रकलायाः धवलिमानं जयति, कुन्तलाः केशाः कज्जलाभाः कज्जलसदृशाः गाढनीलाः इत्थम् एवंरूपा वर्णानां रेखा माधुरी विहरति विलसति। इयं च स्वयं हरिणीवत् चपलनेत्रा वर्तते। अत एवं प्रतीयते यत् महान् गर्वशीलः कामदेव एव युवजनानां मनांसि जेतुं पूर्णमनोरथोऽस्ति ॥ ४१ ॥

कर्पूरमञ्जरी के ओठ लाल हैं, उसका पतला शरीर नवीन सुवर्ण की तरह चमकता है, आँखें द्वितीया के चन्द्रमा से भी अधिक उज्ज्वल हैं, केश काजल की तरह काले हैं—इस तरह कर्पूरमञ्जरी में रङ्गों का अनिर्वचनीय सौन्दर्य झलक रहा है, कर्पूरमञ्जरी स्वयं भी हिरनी की तरह चञ्चल नेत्र वाली है। ऐसा लगता है कि साक्षात् महान् गर्वशाली कामदेव ही नवयुवकों के हृदय को जीतने का अपना मनोरथ पूरा कर रहे हैं ॥ ४१ ॥

टिप्पणी—ओष्ठयोः मुद्रा = ओष्ठमुद्रा। माञ्जिष्ठी = मजीठ के राग से रङ्गी हुई—लाल। मजीठ एक प्रकार की लकड़ी, जिससे रङ्ग बनता है। नवं घटनं निर्माणं यस्य तत् नवघटनं, नवघटनं च तत्सुवर्णं नवघटनसुवर्णम्, तद्वत् उज्ज्वला = नवघटनसुवर्णोज्ज्वला = नये बने हुए सोने के समान उज्ज्वल। बाला च सा इन्दुरेखा = बालेन्दुरेखा तस्याः धवलिमानं जयतीति बालेन्दुरेखाधवलिमजयिनी—नवीन चन्द्रकला की उज्ज्वलता को भी जीतनेवाली—अर्थात् अत्यन्त उज्ज्वल। हरिण्याः इव चञ्चले अक्षिणी यस्याः सा हरिणीचञ्चलाक्षी—हिरनी के समान चञ्चल नेत्र वाली। दीर्घो दर्पः यस्य सः दीर्घदर्पः = बड़े गर्व वाला ॥ ४१ ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विदूषकः—एदं तं मरगअकुञ्जं। इह उववििसअ पिअवअस्सो पडिवालेदु तं। संझा वि सण्णिहिदा वट्टदि। [एतत्तन्मरकतकुञ्जम्। इहोपविश्य प्रियवयस्यः प्रतिपालयतु ताम्। सन्ध्याऽपि सन्निहिता वर्त्तते।]

(उभौ तथा कुरुतः)

राजा—अदिसिसिरं वि हिमाणि संतावदाइणिं अणुहवामि। [अतिशिशिरामपि हिमानीं सन्तापदायिनीमनुभवामि।]

विदूषकः—ता लच्छीसहअरो खणं चिट्ठदु देवो, जाव अहं सिसिरोवआरसामग्गिं संपादेमि। (इति नाटयेन निष्क्रम्य पुरोऽवलोक्य च) किं पुण एसा विअक्खणा इदो णिअडिआ आअच्छदि ?। [तल्लक्ष्मीसहचरः क्षणं तिष्ठतु देवः, यावदहं शिशिरोपचारसामग्री सम्पादयामि [इति नाटयेन निष्क्रम्य पुरोऽवलोक्य च] किं पुनरेषा विचक्षणा इतो निकटे आगच्छति ?]

राजा—संणिहिदो संकेदकालो कहिदो मंतीहिं पि। [सन्निहितः सङ्केतकालः कथितो मन्त्रिभ्यामपि।] (स्मृत्वा मदनाकूतमभिनीय)—

विदूषक—यह मरकतकुञ्ज है, प्रिय मित्र! यहाँ बैठकर उनकी प्रतीक्षा करो शाम भी हो गई है।

(दोनों बैठते हैं)

राजा—अत्यन्त शीतल हिम भी गरम मालूम पड़ता है।

विदूषक—श्रीमान् लक्ष्मी (राजलक्ष्मी) के साथ यहाँ प्रतीक्षा करें, मैं गर्मी दूर करने की सामग्री तैयार करता हूँ (अभिनय के साथ बाहर जाकर और सामने देख कर) क्या विचक्षणा पास आ रही है ?

राजा—मन्त्रियों ने भी सङ्केत-काल के पास होने का जिक्र किया है। (याद करके कामावेश को प्रकट कर) :—

टिप्पणी—उपविश्य = बैठकर–उप√विश्+य–ल्यबन्त। प्रतिपालयतु = प्रतीक्षा करे। सन्निहिता = निकट।

टिप्पणी—हिमानी = हिमस्य महत्त्वं = हिमानी हिम शब्द से बाहुल्य में ई स्त्री प्रत्यय मध्य में आन् आगम। सन्तापं दातुं शीलमस्याः इति सन्तापदायिनी ताम्=सन्तापदायिनीम् दाह उत्पन्न करने वाली सन्ताप पूर्वक√दा धातु से इन् (णिनि) प्रत्यय, य् का आगम फिर स्त्रीलिंग का ई प्रत्यय।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

१. सम्पादयामि = तैयार करता हूँ।

किसलअकरचरणा वि हु कुवलअणअणा मिअङ्कवअणा वि ।
अहह ! णवचम्पअङ्गी तह वि हु तावेइ अच्चरियं ॥ ४२ ॥
[किसलयकरचरणाऽपि खलु कुवलयनयना मृगाङ्कवदनाऽपि ।
अहह ! नवचम्पकाङ्गी तथाऽपि खलु तापयत्याश्चर्यम् ॥ ४२ ॥]

विदूषकः—(सम्यगवलोक्य) अए ! विअक्खणा सिसिरोवआरसामग्गी-सहिदहत्था आअदा । [अये ! विचक्षणा शिशिरोपचारसामग्रीसहितहस्ता आगता ।]

(ततः प्रविशति शिशिरोपचारसामग्रीसहिता विचक्षणा)

विचक्षणा—(परिक्रम्य) अहो ! पिअसहीए महंतो खु विरहदाहज्जरो । [अहो ! प्रियसख्या महान् खलु विरहदाहज्वरः]

विदूषकः—(उपसृत्य) भोदि ! किं एदं ? [भवति ! किमेतत् ?]

व्याख्या—इयं कर्पूरमञ्जरी नवपल्लवाविव कोमलं करचरणं दधाति, अस्याः नयने नीलोत्पले इव मनोहरे, अस्याः मुखम् चन्द्रवत् सुधामयम्, अङ्गानि च नवानि चम्पकपुष्पाणि इव दीप्यमानानि मृदूनि च सन्ति । तथापि सा तापयति दाहज्वर-मुत्पादयति—महान् खेदोऽयम्, आश्चर्यं चास्ते । सन्तापनिवर्तकानां गुणानां सद्भावे-ऽपि सन्तापस्य निवृत्तिर्न—इति विशेषोक्तिरलङ्कारः, सन्तापहेतुं विनाऽपि सन्तापो-त्पत्तिरिति विभावनालङ्कारः—उभयोः सन्देहसङ्करः ॥ ४२ ॥

नये पत्तों के समान कोमल चरणों वाली, नीलकमल के समान नेत्रों वाली, चन्द्रमा के समान सुन्दर मुख वाली तथा चम्पा के नये फूल के समान मनोहर अङ्गों वाली भी यह कर्पूरमञ्जरी सन्ताप उत्पन्न करती है—यह बड़ा आश्चर्य है ॥ ४२ ॥

विदूषक—(अच्छी तरह देखकर) अरे ! शिशिरोपचार की सामग्री हाथ में लिये विचक्षणा आ रही है ?

(शिशिरोपचार की सामग्री लिये विचक्षणा आती है)

विचक्षणा—(घूमकर) प्रिया सखी को बड़ा दाहज्वर है ।

विदूषक—(पास जाकर) बहिन जी ! यह क्या है ?

टिप्पणी—किसलयौ नवपल्लवौ इव करचरणौ यस्याः सा किसलयकरचरणा (बहुव्रीहि) । नये पत्तों के समान कोमल हाथ-पैर वाली । कुवलये इव नयने यस्याः सा कुवलयनयना = नीलकमलाक्षी । मृगाङ्क इव वदनं यस्याः सा मृगाङ्कवदना = चन्द्रमुखी । नवानि चम्पकानि इव अङ्गानि यस्याः सा नवचम्पकाङ्गी । विरहदाहज्वरः = विरह की जलन ॥ ४२ ॥

टिप्पणी—शिशिरोपचारस्य सामग्री = शिशिरोपचारसामग्री = सन्तापनिवर्तकद्रव्य-समूह-चन्दनलेपादि

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विचक्षणा—सिसिरोवआरसामग्गी । [शिशिरोपचारसामग्री]

विदूषकः—कस्स किदे ! [कस्य कृते ?]

विचक्षणा—पिअसहीए किदे । [प्रियसख्याः कृते ।]

विदूषकः—ता मह्य वि अद्धं देहि ? [तन्मह्यमपि अर्धं देहि ?]

विचक्षणा—किं णिमित्तं ? [किं निमित्तम् ?]

विदूषकः—महाराअस्स किदे । [महाराजस्य कृते ।]

विचक्षणा—किं पुण कारणं तस्स ? [किं पुनः कारणं तस्य ?]

विदूषकः—कप्पूरमञ्जरिए वि किं ? [कर्पूरमञ्जर्या अपि किम् ?]

विचक्षणा—किं ण जाणासि महाराअस्स दंसणं ? [किं न जानासि महाराजस्य दर्शनम् ?]

विदूषकः—तुमं वि किं ण जाणासि महाराअस्स कप्पूरमञ्जरीए दंसणं ? [त्वमपि किं न जानासि महाराजस्य कर्पूरमञ्जर्या दर्शनम् ?]

(इत्युभौ हसतः)

विचक्षणा—ता कहिं महाराओ ? [तत् कुत्र महाराजः ?]

विदूषकः—तुह वअणेण मरगअपुञ्जे चिट्ठदि । [तव वचनेन मरकतपुञ्जे तिष्ठति ।]

विचक्षणा—शीतलता पहुँचाने का सामान ।

विदूषक—किसके लिये ?

विचक्षणा—अपनी प्रिय सखी के लिए ।

विदूषक—मेरे लिए भी आधा दो ।

विचक्षणा—किस लिए ?

विदूषक—महाराज के लिए ।

विचक्षणा—उनको क्या हो गया है ?

विदूषक—कर्पूरमञ्जरी को क्या हो गया है ?

विचक्षणा—क्या तुम्हें कर्पूरमञ्जरी के महाराज के दर्शन करने का पता नहीं है ?

विदूषक—तुम्हें भी क्या महाराज के कर्पूरमञ्जरी को देखने का पता नहीं है ?

(दोनों हँसते हैं)

विचक्षणा—महाराज कहाँ हैं ?

विदूषक—तुम्हारे कहने से मरकतमणि से युक्त चबूतरे वाली कुञ्ज में है ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विचक्षणा—ता महाराएण सह मरगअपुञ्जदुआरे चिट्ठ खणं, जेण उह-अदंसणे जादे सिसिरोवआरसामग्गीए जलञ्जली दिज्जदि। [तन्महाराजेन सह मरकतकुञ्जद्वारे तिष्ठ क्षणं, येनोभयदर्शने जाते शिशिरोपचारसामग्र्या जलाञ्जलिर्दीयते।]

विदूषकः—(तामपहृत्य) तहिं गच्छ जदो णागच्छसि। [तत्र गच्छ यतो नागच्छसि] (इति क्षिपति) (पुनस्तां प्रति) ता कीस दुआरदेसे भविदव्वं ? [तत् किं द्वारदेशे भवितव्यम् ?]

विचक्षणा—देवीए आदेसेण कप्पूरमञ्जरी समाअच्छदि। [देव्या आदेशेन कर्पूरमञ्जरी समागच्छति।]

विदूषकः—को तीए आदेसो ? [कः तस्या आदेशः ?]

विचक्षणा—तहिं देवीए बालतरुणो तिण्णि आरोविदा। [तत्र देव्या बालतरवस्त्रय आरोपिताः।]

विदूषकः—को को ? [कः कः ?]

विचक्षणा—कुरवअतिलअअसोआ। [कुरबकतिलकाशोकाः]

विदूषकः—ता किं तेहिं ? [तत् किं तैः ?]

विचक्षणा—भणिदा सा देवीए जधा [भणिता सा देव्या यथा]—

कुरवअतिलअअसोआ आलिंगणदंसणग्गचरणहआ।
विअसन्ति कामिणीणं ता ताणं देहि दोहलअं ॥ ४३ ॥

विचक्षणा—महाराज के साथ मरकतकुन्ज के द्वार पर कुछ देर ठहरो, ताकि दोनों को एक दूसरे के दर्शन हो जाने पर शिशिरोपचार सामग्री को छोड़ दिया जाय।

विदूषक—(उसको खींच कर) वहां जा, जहां से फिर न आवे (मर जा)। धक्का देता है) (फिर उससे) क्या मैं द्वार पर ठहरूँ ?

विचक्षणा—महारानी के आदेश से कर्पूरमञ्जरी आवेगी।

विदूषक—उनका क्या आदेश है ?

विचक्षणा—वहाँ पर महारानी ने तीन छोटे-छोटे वृक्ष लगाये हैं।

विदूषक—कौन, कौन ?

विचक्षणा—कुरबक (लालकटसरैया), तिलक और अशोक।

विदूषक—उनसे क्या काम ?

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विचक्षणा—उससे महारानी ने इस तरह कहा है—

[कुरबकतिलकाशोका आलिङ्गनदर्शनाग्रचरणहताः ।
विकसन्ति कामिनीनां तत्तेषां देहि दोहदकम् ॥ ४३ ॥]

एण्हि तं संपादइस्सदि । [इदानीं तत् सम्पादयिष्यति ।]

विदूषकः—तणमरगअकुञ्जादो पिअवअस्सं। आणिअ तमालविडवन्तरिदं ठाविअ एदं पच्चक्खं करइस्सं। [तन्मरकतकुञ्जात् प्रियवयस्यमानीय तमालविटपान्तरितं स्थापयित्वा एतत्प्रत्यक्षं कारयिष्यामि] (तथा नाटयित्वा राजानं प्रति) भो भो ! उट्ठिअ पेक्ख णिअहिअअसमुद्दचन्दलेहं। [भो भो ! उत्थाय प्रेक्षस्व निजहृदयसमुद्रचन्द्रलेखाम् ।]

(राजा तथा करोति)

अन्वयः—कुरबकतिलकाशोकाः कामिनीनाम् आलिङ्गनदर्शनाग्रचरणहताः विकसन्ति, तत् तेषां दोहदकम् देहि ।

सरलार्थः—कुरबकतिलकाशोकाः वृक्षाः कामिनीनाम् आलिङ्गनेन दर्शनेन अग्रचरणेन च हताः यथाक्रमं स्पृष्टाः अवलोकिताः ताडिताश्च सन्तः विकसन्ति, तत् तस्मात् कारणात् तेषां दोहदकं गर्भाभिलाषं देहि ॥ ४३ ॥

कामिनियों के आलिङ्गन से कुरबक, देखने से तिलक तथा पादाघात से अशोक खिलता है, इसलिए इनका दोहद पूर्ण कर ॥ ४३ ॥

अब वह उसे पूर्ण करेगी।

विदूषक—मरकत कुञ्ज से महाराज को लाकर तमालविटप में छिपा कर यह दृश्य प्रत्यक्ष दिखलाऊँगा। (ऐसा अभिनय कर-राजा से) अरे, उठो, अपने हृदय समुद्र की चन्द्रलेखा को देखो।

(राजा वैसा ही करता है)

टिप्पणी—कुरबकं तिलकोऽशोकश्च कुरबकतिलकाशोकाः (द्वन्द्वसमास)। आलिंगनेन दर्शनेन चरणाग्रेण च हताः = आलिंगनदर्शनचरणाग्रहताः = स्पृष्टावलोकितताडिताः। दोहदकम् = गर्भवती स्त्री की इच्छा ॥ ४३ ॥

टिप्पणी—तमालविटपेन अन्तरितम् = तमालविटपान्तरितम्–तमाल वृक्ष में छिपा हुआ। स्थापयित्वा = बैठाकर–√स्थापि + इ + त्वा। क्त्वा प्रत्यय। उत्थाय = उठकर उद्–√स्था + य = उत्थाय–उद् + स्था = उत्था–हल्संधि, ल्यप् प्रत्यय। निजं च तत् हृदयम् = निजहृदयम्, तदेव समुद्रः, तस्य चन्द्रलेखा तां, निजहृदयसमुद्रचन्द्रलेखाम्–जिस तरह चन्द्रमा के देखने से समुद्र उमड़ता है, उसी तरह तुम्हारे हृदय को प्रसन्न करने वाली।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(ततः प्रविशति विशेषभूषिताङ्गी कर्पूरमञ्जरी)

कर्पूरमञ्जरी—कहिं पुण विअक्खणा ? [क्व पुनर्विचक्षणा ?]

विचक्षणा—(तामुपसृत्य) सहि ! करीअदु देवीए समादिट्ठं [सखि ! क्रियतां देव्या समादिष्टम् ।]

राजा—बअस्स ! किं पुण तं ? [वयस्य ! किं पुनस्तत् ?]

विदूषकः—तमालविडबान्तरितो जाण । [तमालविटपान्तरितो जानीहि ।]

(राजा तथा करोति)

विचक्षणा—एसो कुरवअतरू । [एष कुरवकतरुः ।]

(कर्पूरमञ्जरी तमालिङ्गति)

राजा—

णवकुरवअरुक्खो कुम्भथोरत्थणीए रहसविरइएणं णिब्भरालिंगणेणं ।
तह कुसुमसमिद्धिं लम्भिदो सुन्दरीए जह भमलकुलाणं तत्थ जत्ता पउत्ता ॥४४॥
[नवकुरवकवृक्षः कुम्भस्थूलस्तन्या रभसविरचितेन निर्भरालिङ्गनेन ।
तथा कुसुमसमृद्धिं लम्भितः सुन्दर्या यथा भ्रमरकुलानां तत्र यात्रा प्रवृत्ता ॥४४॥]

अन्वयः—कुम्भस्थूलस्तन्या सुन्दर्या नवकुरवकवृक्षः रभसविरचितेन निर्भरालिङ्गनेन तथा कुसुमसमृद्धिं लम्भितः, यथा भ्रमरकुलानाम् यात्रा तत्र प्रवृत्ता ।

व्याख्या—कुम्भाविव पीनपयोधरया सुन्दर्या रभसविरचितेन सहसा कृतेन

(विशेष रूप से अङ्गों को सजाये हुए कर्पूरमञ्जरी आती है)

कर्पूरमञ्जरी—विचक्षणा कहाँ है ?

विचक्षणा—(उसके पास जाकर) सखी ! महारानी की आज्ञा पूर्ण करो ?

राजा—मित्र ! वह कैसी आज्ञा है ?

विदूषक—तमाल विटप में छिपकर देखो ।

(राजा वैसा ही करता है)

विचक्षणा—यह कुरवक का वृक्ष है ।

(कर्पूरमञ्जरी उसका आलिंगन करती है)

राजा—कुम्भों के समान स्थूल स्तनवाली अर्थात खूब उभरे हुये स्तनवाली इस नायिका

टिप्पणी—विशेषं भूषितानि अंगानि यस्याः सा विशेषभूषितांगी = खास तौर से अंगों को सजाये हुयें ।

टिप्पणी—कुम्भौ इव स्थूलौ स्तनौ यस्याः सा कुम्भस्थूलस्तन्या = घटपीनपयोधरया ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विदूषकः—भो ! पेक्ख पेक्ख महिन्दजालं। जेण [भोः प्रेक्षस्व प्रेक्षस्व महेन्द्रजालं[1] येन]—

बालो वि कुरवअतरू तरुणीए गाढमुवगूढो।
सहस त्ति कुसुमणिअरं मअणसरं विअ समुग्गिरइ ॥ ४१ ॥
[बालोऽपि कुरबकतरुस्तरुण्या गाढमुपगूढः।
सहसेति कुसुमनिकरं मदनशरमिव समुद्गिरति ॥ ४५ ॥]

राजा—ईदिसो ज्जेव दोहलअस्स प्पहावो। [ईदृश एव दोहदस्य प्रभावः।]

विचक्षणा—अह एसो तिलअद्दुभो। [अथैष तिलकद्रुमः।]

निर्भरालिङ्गनेन गाढालिङ्गनेन नवकुरबकवृक्षः तथा कुसुमानां समृद्धि सम्पदं लम्भितः प्रापितः यथा भ्रमरकुलानां भ्रमरपङ्क्तीनां यात्रा तत्र प्रवृत्ता प्रसक्ता। पीनपयोधराया अस्याः आलिङ्गनेन नवकुरबकवृक्षे तथा पुष्पाणि आजग्मुः यथा भ्रमराः समन्तात् तत्र परिवेष्टितुं प्रारेभिरे ॥ ४४ ॥

व्याख्या—बालः अपि शिशुरपि कुरबकतरुः कुरबकवृक्षः तरुण्या सुन्दर्या गाढम् निर्भरम् उपगूढः आलिङ्गितः सन् सहसैव पुष्पसंचयं मदनशरमिव समुद्गिरति उद्वमति प्रकटीकरोति ॥ ४५ ॥

ने यकायक किये हुये अपने प्रगाढ आलिंगन से नये कुरबक वृक्ष में इतने फूल खिला दिये हैं कि भौंरों का वहाँ मंडराना प्रारम्भ हो गया है ॥ ४४ ॥

विदूषक—अरे ! इस जादू की विद्या को देखो, जिससे कि—

इस छोटे ही कुरबक वृक्ष पर इस सुन्दरी के प्रगाढ़ आलिंगन से यकायक ही कामदेव के बाणों की तरह फूल निकलने लगे हैं ॥ ४५ ॥

राजा—दोहद का प्रभाव ही ऐसा है।

विचक्षणा—यह तिलक का वृक्ष है।

घट के समान उठे हुये स्तन वाली। रभसः = सहसा-यकायक। लम्भितः—प्राप्त कराया-√लम्भि+त = लम्भितः ण्यन्त लभ् (लम्भि) से क्तप्रत्यय ॥ ४४ ॥

१. महेन्द्रजालम् = चमत्कार करने वाली कपट की विद्या।

टिप्पणी—गाढमुपगूढः = खूब जोर से आलिंगन किया हुआ। समुद्गिरति = उगलता है—सम्+उद्+√गॄ+अ+ति = समुद्गिरति–सम् उद् पूर्वक√गॄ (तुदादि) से वर्तमान काल में प्रथमपुरुष का एकवचन ॥ ४५ ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(कर्पूरमञ्जरी चिरं तिर्यगवलोकयति)

राजा—

तिक्खाणं तरलाणँ कज्जलकलासंवग्गिदाणं पि से
पासे पञ्चसरं सिलीमुहधरं णिच्चं कुणन्ताणँ अ।
णेत्ताणं तिलअद्दुमे णिवडिदा घाडी मअच्छीअ जं
तं सो मञ्जरिपुञ्जदन्तुरसिरो रोमाञ्चिदो व्व ट्ठिदो ॥ ४६ ॥

**[तीक्ष्णयोस्तरलयोः कज्जलकलासंवलिगतयोरप्यस्याः
पार्श्वे पञ्चशरं शिलीमुखधरं नित्यं कुर्वतोश्च।
नेत्रयोस्तिलकद्रुमे निपतिता घाटी मृगाक्ष्या यत्
तत् स मञ्जरीपुञ्जदन्तुरशिरा रोमाञ्चित इव स्थितः ॥ ४६ ॥]**

विचक्षणा—एसो असोअसाहो। [**एष अशोकशाखी।**]

अन्वयः—तीक्ष्णयोः तरलयोः अपि कज्जलकलासंवलिगतयोः, नित्यं शिलीमुखधरम् पञ्चशरम् पार्श्वे कुर्वतोः च अस्याः मृगाक्ष्याः नेत्रयोः घाटी यत् तिलकद्रुमे निपतिता, तत् स मञ्जरीपुञ्जदन्तुरशिरा रोमाञ्चित इव स्थितः।

व्याख्या—तीक्ष्णयोः दीर्घकुशाग्रयोः तरलयोः चञ्चलयोः अपि कज्जलकलया अञ्जनरेखया संवलिगतयोः अलंकृतयोः, नित्यं सततं शिलीमुखधरम् बाणधरम् पञ्चशरं कामदेवं पार्श्वे कुर्वतोः कामदेवशरसाम्यं दधतोः अस्याः मृगाक्ष्याः नेत्रयोः घाटी दर्शनव्यापारविशेषः यत् तिलकद्रुमे निपतिता, तत् तस्मात् स मञ्जरीणां पुञ्जैः दन्तुराणि साङ्कुराणि शिरांसि यस्य एवंभूतः रोमाञ्चित इव सञ्जातरोमाञ्च इव स्थितः वर्तते ॥ ४६ ॥

(कर्पूरमञ्जरी बड़ी देर तक तिरछी निगाह से देखती है)

राजा—हिरन जैसे नयनों वाली इस के तीक्ष्ण और चञ्चल, काजल लगे हुये तथा हमेशा बाण धारण किये हुये कामदेव को अपने पास करने वाले (रखने वाले) नेत्र ज्यों ही तिलक वृक्ष पर पड़े कि मंजरी के समूह से उसकी अग्रशाखायें इस तरह लद गई जैसे कि उसे रोमाञ्च हो गया हो ॥ ४६ ॥

विचक्षणा--यह अशोक का वृक्ष है।

टिप्पणी—पञ्च शराः सन्ति यस्य तम् पञ्चशरम्=कामदेवम्। शिलीमुखान् धरति तम् शिलीमुखधरम् = शरधरम् (कृदन्त)। मञ्जरीणां पुञ्जैः दन्तुराणि शिरांसि यस्य स मञ्जरीपुञ्जदन्तुरशिराः = मञ्जरी के समूह से नुकीले हो गये है अग्रभाग जिसके (बहुव्रीहि) ॥४६॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(कर्पूरमञ्जरी चरणताडनं नाटयति)

राजा—

असोअतरुताडणं रणिदणेउरेणंघिणा
किदं मअलञ्छणच्छविमुहीअ हेलुल्लसं ।
सिहासु सुअलासु वि त्थवअमण्डणाडम्बरं
ठिदं अ गअणङ्गणं जणणिरिक्खणिज्जं खणं ॥ ४७ ॥

[अशोकतरुताडनं रणितनूपुरेणाङ्घ्रिणा
कृतञ्च मृगलाच्छनच्छविमुख्या हेलोल्लासम् ।
शिखासु सकलास्वपि स्तवकमण्डनाडम्बरं
स्थितञ्च गगनाङ्गनं जननिरीक्षणीयं क्षणम् ॥ ४७ ॥]

अन्वयः—मृगलाञ्छनच्छविमुख्या रणितनूपुरेण अङ्घ्रिणा हेलोल्लासम् अशोकतरुताडनम् कृतम् च, सकलासु अपि शिखासु स्तवकमण्डनाडम्बरं गगनाङ्गनं क्षणम् जननिरीक्षणीयम् स्थितम् च ।

व्याख्या—चन्द्रवत् कान्तिमन्मुखं धारयन्त्या अनया कर्पूरमञ्जर्या नूपुराणां ध्वनिमता चरणेन हेलोल्लासम् सविलासम् अशोकतरुः पादेन आहतः सकलासु सर्वास्वपि शिखासु स्तबकविकाससमुज्ज्वलं गगनाङ्गनं गगनाजिरं क्षणं क्षणेनैव जनानां निरीक्षणीयम् दर्शनीयम् स्थितं च सञ्जातञ्च । चकारद्वयेनात्र यौगपद्यं द्योत्यते ॥ ४७ ॥

(कर्पूरमञ्जरी पैर मारने का अभिनय करती है)

राजा—चन्द्रमा के समान कान्ति से युक्त मुखवाली इस कर्पूरमंजरी ने नूपुर बजते हुये अपने चरण से विलासपूर्वक ज्यों ही अशोक वृक्ष पर पादाघात किया कि क्षणमात्र में ही सब चोटियों पर गुच्छों के खिलने से चमकता हुआ आकाश सुन्दर हो गया ॥ ४७ ॥

टिप्पणी—रणितः नूपुरः यस्मिन् तेन रणितनूपुरेण = नूपुरों के शब्द से युक्त । अंघ्रिः = चरण । मृगस्य लांछनमस्ति यस्य स मृगलाञ्छनः, तस्य छविः यस्य तत् मृगलाञ्छनच्छवि, तादृशं मुखं यस्याः तया मृगलाञ्छनच्छविमुख्या = चन्द्रवदनया । स्तवकानां मण्डनेन आडम्बरः यस्य तत् स्तवकमण्डनाडम्बरम् = स्तवकविकाससमुज्ज्वलम् । जनानां निरीक्षणीयम् = जननिरीक्षणीयम् = सुन्दरम् ॥ ४७ ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विदूषकः—भो वअस्स ! जं सअं ण किदं दोहलअदाणं देवीए, जाणासि एत्थ किं कारणं ? [भो वयस्य ! यत् स्वयं न कृतं दोहदकदानं देव्या, जानासि तत्र किं कारणम् ?]

राजा—तुमं जाणेसि ? [त्वं जानासि ?]

विदूषकः—भणामि, जइ देवो ण कुप्पदि ! [भणामि, यदि देवो न कुप्यति ।]

राजा—को एत्थ रोसावसरो ? भण उन्मुद्दिआए जीहाए। [कोऽत्र रोषावसरः ? भण उन्मुद्रितया जिह्वया ।]

विदूषकः—

इह जइ वि कामिणीणं सुन्देरं धरइ अवअवाणँ सिरी।
अहिदेवअ व्व णिवसइ तह वि हु तारुण्णए लच्छी ॥ ४८ ॥
[इह यद्यपि कामिनीनां सौन्दर्यं धारयत्यवयवानां श्रीः ।
अधिदेवतेव निवसति तथाऽपि खलु तारुण्ये लक्ष्मीः ॥ ४८ ॥]

राजा—सुणिदो दे अहिप्पाओ । किं उण किं वि भणामो [श्रुतस्तेऽभिप्रायः । किं पुनः किमपि भणामः]—

अन्वयः—इह यद्यपि कामिनीनाम् अवयवानाम् श्रीः सौन्दर्यम् धारयति, तथापि तारुण्ये लक्ष्मीः अधिदेवता इव निवसति ।

सरलार्थः—इह संसारे यद्यपि कामिनीनाम् रमणीनाम् अवयवानाम् अङ्गानाम् श्रीः सौन्दर्यं धारयति, यद्यपि कामिनीनां सर्वेऽवयवाः सुन्दराः भवन्ति, तथापि तारुण्ये यौवने लक्ष्मीः सौन्दर्यम् अधिदेवतेव अधिष्ठात्री देवीव निवसति तिष्ठति । तारुण्ये खलु अद्भुतं सौन्दर्यमुत्पद्यते ॥ ४८ ॥

विदूषक—मित्र ! महारानी ने स्वयं दोहद देने का कार्य नहीं किया, क्या इसका कारण जानते हो ?

राजा—क्या तुम जानते हो ?

विदूषक—कहूँ, यदि श्रीमान् क्रोध न करें ।

राजा—इसमें क्रोध का क्या अवसर है, जबान खोलकर कहो ?

विदूषक—संसार में यद्यपि स्त्रियों के अंगों की शोभा में ही सौन्दर्य होता है, फिर भी युवावस्था में सौन्दर्य अधिष्ठात्री देवता की तरह रहता है, अर्थात् युवावस्था में विशेष सौन्दर्य दिखाई पड़ता है ॥ ४८ ॥

राजा—तेरा अभिप्राय सुना । फिर भी कुछ कहता हूँ—

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

टिप्पणी—उन्मुद्रिता = खुली हुई, स्वच्छन्द ।

बालाओ होन्ति कोऊहलेण एमेअ चवलचित्ताओ ।
दरलसिदथणीसु पुणो णिवसइ मअरद्धअरहस्सं ॥ ४९ ॥
[बाला भवन्ति कौतूहलेनैवमेवं चपलचित्ताः ।
दरलसितस्तनीषु पुनर्निवसति मकरध्वजरहस्यम् ॥ ४९ ॥]

विदूषकः—तरुणो वि रूअरेहारहस्सेण फुल्लंति, ण उण रइरहस्सं जाणन्ति । [तरवोऽपि रूपरेखारहस्येन विकसन्ति, न पुनः रतिरहस्यं जानन्ति ।]

(नेपथ्ये)

वैतालिकः—सुहसंझा भोदु देवस्स [सुखसन्ध्या भवतु देवस्य]—
लोआणं लोअणेहिं सह कमलवणं अद्धणिद्दं कुणन्तो
मुञ्चन्तो तिक्खभावं सह अ सरभसं माणिणीमाणसेहिं ।
मञ्जिट्ठारत्तसुत्तच्छविकिरणचओ चक्कवाएक्कमित्तो
जादो अत्थाचलत्थी सपदि दिणमणो पक्कणारंगपिंगो ॥ ५० ॥
[लोकानां लोचनैः सह कमलवनमर्द्धनिद्रं कुर्वन्
मुञ्चंस्तीक्ष्णभावं सह च सरभसं मानिनीमानसैः ।

सरलार्थः—बालाः नवयुवत्योऽपि कौतूहलेन यौवनसुखोपभोगोत्सुकतया एवमेवं चपलचित्ताः तरलहृदयाः भवन्ति, यासां तु स्तनौ ईषदुन्मिषितौ तासु तु मन्मथस्य रहस्यं रतिसर्वस्वम् निवसति ॥ ४९ ॥

अन्वयः—मञ्जिष्ठारक्तसूत्रच्छविकिरणचयः चक्रवाकैकमित्रम् पक्वनारङ्गपिङ्गः दिनमणिः लोकानाम् लोचनैः सह कमलवचनम् अर्धनिद्रम् कुर्वन्, मानिनीमानसैः सह सरभसम् तीक्ष्णभावं च मुञ्चन्, सपदि अस्ताचलार्थी जातः ।

व्याख्या—मञ्जिष्ठारागेण रक्तसूत्राणामिव कान्तिमन्तं किरणसमूहं धारयन्,

---

बालायें कुतूहल से इसी तरह चञ्चल चित्तवाली होती हैं । जिनके कुछ कुछ स्तन उभर आये हों, उनमें तो काम का रहस्य ही छिपा रहता है ॥ ४९ ॥

विदूषक—वृक्ष भी सौन्दर्य के प्रभाव से खिल उठते हैं, यद्यपि वे रतिरहस्य नहीं जानते हैं ।

(नेपथ्य में)

वैतालिक—महाराज के लिये सन्ध्या सुखकर हो—
मंजिष्ठा राग से रंगे हुये सूत्रों की तरह कान्तिवाली किरणों को धारण करने वाला,

---

टिप्पणी—दरम् लसितौ स्तनौ यासां तासु = दरलसितस्तनीषु = ईषदुन्मीलितस्तनीषु। कुछ कुछ उठे हुये स्तनों वाली सुन्दरियों में ॥ ४९ ॥

टिप्पणी—अर्धं निद्रा यस्य तत्-अर्धनिद्रम् = निमीलितप्रायम्=अर्धमिचा । मञ्जिष्ठया

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मञ्जिष्ठारक्तसूत्रच्छविकिरणचयश्चक्रवाकैकमित्रं
जातोऽस्ताचलार्थी सपदि दिनमणिः पक्वनारङ्गपिङ्गः ॥ ५० ॥]

राजा—भो वअस्स ! संणिहिदो संझासमओ वट्टदि [भो वयस्य ! सन्निहितः सन्ध्यासमयो वर्त्तते ।]

विदूषकः—संकेदकालो कधिदो वंदीहिं । [सङ्केतकालः कथितो वन्दिभिः ।]

कर्पूरमञ्जरी—सहि विअक्खणे ! गमिस्सं दाव, विआलो संवुत्तो । [सखि विचक्षणे ! गमिष्यामि तावत् । विकालः संवृत्तः ।]

विचक्षणा—एव्वं करीअदु ।] एवं क्रियताम् ।]

(इति परिक्रम्य निष्क्रान्ताः सर्वे)

॥ इति द्वितीयजवनिकान्तरम् ॥

चक्रवाकाणां मुख्यं मित्रम्, पक्वं नारङ्गमिव पीतरक्तः दिनमणिः सूर्यः लोकानां जनानां लोचनैः सह कमलवनम् अर्धनिद्रं मुकुलितं कुर्वन्, यथा सन्ध्यायां मानिन्यः प्रणयकोपं त्यजन्ति तथा स्वतीक्ष्णभावं परिहरन् सपदि क्षणादेव अस्ताचलार्थी अस्ताचलं जिगमिषुः जातः ॥ ५० ॥

चक्रवाक पक्षियों का परम मित्र तथा पकी हुई नारंगी के समान लाल और पीला सूर्य लोगों की आंखों के साथ-साथ कमल वन को निमीलित-सा करता हुआ, मानिनियों के मन के साथ-साथ अपने तेज को घटाता हुआ एक दम अस्ताचल की ओर जाने लगा है ॥ ५० ॥

राजा—मित्र ! सन्ध्या समय निकट आ गया है।

विदूषक—वन्दिगणों ने संकेत-काल बता दिया है।

कर्पूरमञ्जरी—सखि विचक्षणे ! मैं तो चलूँगी, शाम हो रही है।

विचक्षणा—ऐसा ही करो।

(घूम कर सब चले जाते हैं)

॥ दूसरा जवनिकान्तर समाप्त ॥

रक्तं मञ्जिष्ठारक्तम्—मञ्जिष्ठारक्तं च तत् सूत्रं=मञ्जिष्ठारक्तसूत्रं, तद्वत् छविः यस्य सः मञ्जिष्ठारक्तसूत्रच्छविः तथाविधः किरणचयः यस्य=मञ्जिष्ठारक्तसूत्रच्छविकिरिणचयः—लाल सूत्र की तरह कान्ति वाली किरणों से युक्त। दिनमणिः=सूर्य। पक्वं च तत् नारंगं=पक्वनारंगम् तद्वत् पिंगः=पक्वनारङ्गपिंगः=पकी हुई नारंगी के समान लाल और पीला। जिस तरह मानिनी स्त्रियाँ सन्ध्या होने पर अपने प्रेमियों से मान करना छोड़ देती हैं उस तरह अपनी तीक्ष्णता को सूर्य भी छोड़ देता है ॥ ५० ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तृतीयं जवनिकान्तरम्

(ततः प्रविशति राजा विदूषकश्च)

राजा—(तामनुसन्धाय[1])—

दूरे किज्जउ चम्पअस्स कलिआ कज्जं हलिद्दाअ किं ?
उत्तत्तेण अ कञ्चणेण गणणा का णाम जच्चेण वि ।
लावण्णस्स णवग्गदेन्दुमहुरच्छाअस्स तिस्सा पुरो
पच्चग्गेहिं वि केसरस्स कुसुमक्केरेहि किं कारणं ॥ १ ॥

**[दूरे क्रियतां चम्पकस्य कलिका कार्यं हरिद्रायाः किम् ?
उत्तप्तेन च काञ्चनेन गणना का नाम जात्येनापि ?
लावण्यस्य नवोद्गतेन्दुमधुरच्छायस्य तस्याः पुरः
प्रत्यग्रैरपि केसरस्य कुसुमोत्करैः किं कारणम् ? ॥ १ ॥]**

अन्वयः—चम्पकस्य कलिका दूरे क्रियताम्, हरिद्रायाः कार्यम् किम् ? नवोद्गतेन्दुमधुरच्छायस्य तस्याः लावण्यस्य पुरः जात्येन अपि उत्तप्तेन काञ्चनेन का नाम गणना ? प्रत्यग्रैः अपि केसरस्य कुसुमोत्करैः किम् कारणम् ?

व्याख्या—चम्पकस्य कलिका दूरे क्रियताम्, हरिद्रायाः कार्यम् प्रयोजनं किम्, न किमपीत्यर्थः। नवोद्गतस्य नवोदितस्य इन्दोः चन्द्रस्येव मधुरां मनोहारिणीं कान्ति धारयतः तस्याः कर्पूरमञ्जर्याः लावण्यस्य पुरः अग्रतः जात्येन उत्कृष्टेन उत्तप्तेन ज्वलता काञ्चनेन सुवर्णेनापि का नाम गणना को विचारः ? न कोऽपीत्यर्थः । प्रत्यग्रैः अभिनवैः केसरस्य वकुलस्य कुसुमोत्करैः पुष्पसञ्चयैः किं कारणम् फलम् ? न किमपीत्यर्थः । कर्पूरमञ्जर्याः लावण्यं न कस्याप्युपमां क्षमेत । चम्पककलिका हरिद्रा तप्तकाञ्चनं केसरकुसुमञ्चापि न तदुपमानयोग्यानि ॥' 'मुक्ताफलेषु

(राजा और विदूषक रंगमंच पर आते हैं)

राजा—(उसको याद कर) :—

चम्पा की कली को दूर रखो, हल्दी से भी क्या प्रयोजन ? नवीन चन्द्रमा की तरह मधुर कान्ति वाले कर्पूरमञ्जरी के लावण्य के सामने विशुद्ध और तपे हुये सोने की भी क्या

---

१. अनुसन्धाय = स्मरण कर–अनु + सम् + √धा + य–ल्यबन्त ।

टिप्पणी—हरिद्रा = हल्दी । जात्य = उत्तम । लावण्य = 'मोतियों की तरल छाया की तरह अंगों में चमकने वाली कान्ति । नवश्चासौ उद्गतः=नवोद्गतः, नवोद्गतश्चासौ इन्दुः= नवोद्गतेन्दुः, तस्येव मधुरा छाया यस्य तस्य नवोद्गतेन्दुमधुरच्छायस्य=नवोदितचन्द्रमधुरकान्तेः । प्रत्यग्र=नया । कुसुमोत्कर=फूलों का समूह ॥ १ ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अवि अ [अपि च]—

मरगअमणिजुट्ठा हारलट्ठि व्व तारा भमरकवलिअद्धा मालईमालिए व्व।
रहसवलिअकंठो तीअ दिट्ठी वरिट्ठा सवणपहणिविट्टा माणसं मे पविट्टा ॥२॥
[मरकतमणिजुष्टा हारयष्टिरिव तारा भ्रमरकवलिताद्धां मालतीमालिकेव।
रभसवलितकण्ठी तस्या दृष्टिर्वरिष्ठा श्रवणपथनिविष्टा मानसं मे प्रविष्टा ॥२॥]

च्छायायास्तरलत्वमिवान्तरा। प्रतिभाति यदङ्गेषु तल्लावण्यमिहाच्यते ॥' इति लावण्यलक्षणम् ॥ १ ॥

अन्वयः—तस्याः रभसवलितकण्ठी वरिष्ठा दृष्टिः मरकतमणिजुष्टा तारा हारयष्टिः, इव, भ्रमरकवलितार्धा मालतीमालिका इव, श्रवणपथनिविष्टा मे मानसं प्रविष्टा।

व्याख्या—रभसेन वेगेन हर्षेणा वा दर्शकानां कण्ठं ध्यानं स्वाभिमुखमाकर्षन्ती तस्याः वरिष्ठा उत्कृष्टा दृष्टिः मरकतमणिभिः श्यामलैः हरिन्मणिभिः जुष्टा युक्ता तारा उत्तमा हारयष्टिरिव, भ्रमरैः अर्धग्रसिता मालतीमालिका इव, श्रवणपथनिविष्टा आकर्णकृष्टा दीर्घायितेत्यर्थः मे मम मानसं हृदयं प्रविष्टा। कर्पूरमञ्जर्याः नयने मम हृदि सन्निविष्टे, अहं मनसा सततमेव तन्नयने ध्यायामि ॥ २ ॥

गिनती? नये केसर के फूलों से क्या फल? अर्थात् कर्पूरमञ्जरी के सौन्दर्य की चम्पा, हरिद्रा, तपे हुये सोने तथा केसर के फूल इन किसी से भी उपमा नहीं बन सकती ॥ १ ॥

और भी—

वेग से अथवा प्रसन्नता से दर्शकों के ध्यान को अपनी ओर खींचने वाली कर्पूरमञ्जरी की सुन्दर दृष्टि श्यामवर्ण की मरकत मणियों से युक्त उत्तम हार की तरह, भ्रमरों से आधी घिरी हुई मालती पुष्पों की माला की तरह और उसके कानों तक खिंची हुई मेरे मन में समा गई है ॥ २ ॥

टिप्पणी—मरकतमणिभिः जुष्टा = मरकतमणिजुष्टा=हरिन्मणियुक्ता। तारा = उत्तम। भ्रमरैः कवलितम् अर्धं यस्याः सा भ्रमरकवलितार्धा = भ्रमरग्रस्तार्धा = भौरों से आधी घिरी हुई। रभसेन वलितः कण्ठो (दर्शकानामिति यावत्) यया सा रभसवलितकण्ठी=रभसाकृष्टध्याना—एकाएक दर्शकों का अपनी ओर ध्यान खींचने वाली। वरिष्ठा=उत्कृष्टा—अतिशयेन उरुरिति वरिष्ठा = उरु शब्द से इष्ठन् प्रत्यय और वर् आदेश। श्रवणयोः पन्था = श्रवणपथः तम् निविष्टा = श्रवणपथनिविष्टा = कर्णान्तायता ॥२॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विदूषकः—भो वअस्स ! किं तुमं भज्जाजिदो विअ किं पि किं पि कुरुकुराअन्तो चिट्ठसि ? । [भो वयस्य ! किं त्वं भार्याजित इव किमपि किमपि कुरुकुरायमाणस्तिष्ठसि ?]

राजा—वअस्स ! सिविणअं दिट्ठं अणुसंधेमि । [वयस्य ! स्वप्नं दृष्टमनुसन्दधामि ।]

विदूषकः—ता कधेदु पिअवअस्सो । [तत् कथयतु प्रियवयस्यः ।]

राजा—

जाणे पङ्करुहाणणा सिविणए मं केलिसज्जागअं
कंदोट्टेण तडित्ति ताडिडमणा हत्थंतरे संठिआ ।
ता कोडेण मए वि झत्ति धरिआ ढिल्लं वरिल्लंचले
तं मोत्तूण गअं अ तीअ सहसा णट्ठा अ णिद्दा वि मे ।। ३ ।।
[जाने पङ्करुहानना स्वप्ने मां केलिशय्यागतम्
इन्दीवरेण झटिति ताडितुमना हस्तान्तरे संस्थिता ।
तत् कौतूहलेन मयापि झटिति धृता शिथिलं वस्त्राञ्चले
तन्मोचयित्वा गतं तया च सहसा नष्टा च निद्राऽपि मे ।। ३ ।।]

अन्वयः—जाने, पङ्करुहानना (सा) स्वप्ने केलिशय्यागतम् माम् इन्दीवरेण ताडितुमनाः झटिति हस्तान्तरे संस्थिता । तत् मया अपि कौतूहलेन झटिति वस्त्राञ्चले शिथिलं धृता, तया तत् मोचयित्वा सहसा गतम्, मे निद्रा अपि नष्टा च ।

व्याख्या—जाने स्मरामि, कमलानना सा कर्पूरमञ्जरी स्वप्ने केलिशय्यागतम् क्रीडातल्पशायिनम् माम् इन्दीवरेण नीलोत्पलेन नयनेनेति भावः । ताडितु-

---

विदूषक—मित्र ! पत्नी द्वारा जीते हुए पुरुष की तरह यह तुम क्या कुरकुराते हो ?
राजा—मित्र ! एक स्वप्न देखा था, उसे याद कर रहा हूँ ।
विदूषक—प्रियमित्र ! मुझे भी बतलाओ ।
राजा—मुझे ऐसा याद पड़ता है कि कमल के समान मुख वाली वह कर्पूरमञ्जरी स्वप्न में मेरी विहारशय्या पर आई और नीलकमल जैसे अपने नेत्रों से प्रहार करने की इच्छा से

टिप्पणी—भार्यया जितः = भार्याजितः = कान्तावशंवदः, स्त्रैणः । कुरुकुरायमाणः = कुरकुर करता हुआ–अनुकरणात्मक शब्द ।

टिप्पणी—पङ्के रोहति = पङ्करुहः (कृदन्त क (अ) प्रत्यय) । पङ्करुहस्येव आननम् यस्याः सा पङ्करुहानना = कमलवदना । इन्दीवर = नीलकमल (नयन) । ताडितुं मनः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विदूषकः—(स्वगतम्) भोदु एव्वं दाव। (प्रकाशम्) भो वअस्स ! अज्ज मए वि सिविणं दिट्ठं। [भवतु एवं तावत् (प्रकाशम्) भो वयस्य ! अद्य मयाऽपि स्वप्नो दृष्टः।]

राजा—(सप्रत्याशम्) ता कहिज्जदु कीरिसं तं सिविणअं ? [तत् कथ्यतां कीदृशः स स्वप्नः ?]

विदूषकः—अज्ज जाणे, सिविणए सुरसरिदासोत्ते सुत्तो म्हि, ता हर-सिरसोवरि दिण्णलीलाचलणाए गंगाए पक्खालिदो म्हि तोएण। [अद्य जाने, स्वप्ने सुरसरित्स्रोतसि सुप्तोऽस्मि; तद्धरशिरस उपरि दत्तलीलाचरणाया गङ्गायाः प्रक्षालितोऽस्मि तोयेन।]

राजा—तदो तदो ? [ततस्ततः ?]

विदूषकः—तदो सरअसमअवरिसिणा जलहरेण जधिच्छं[1] पीदो म्हि। [ततः शरत्समयवर्षिणा जलधरेण यथेच्छं पीतोऽस्मि।]

मनाः प्रहर्तुकामा झटिति सहसा हस्तान्तरे संस्थिता संनिषण्णा। तत् तदा मयाऽपि कौतूहलेन उत्सुकतया झटिति वस्त्राञ्चले वसनप्रान्ते शिथिलं यथास्यात्तथा धृता गृहीता, तया तत् मम धारणम् मोचयित्वा सहसा गतं प्रस्थितम् च, मे मम निद्रा अपि नष्टा च। चकारद्वयं यौगपद्यद्योतनार्थम्, यदैव सा गता तदैव मे निद्राऽपि भग्ना ॥ ३ ॥

एकाएक मेरी भुजाओं के बीच बैठ गई। तब मैंने भी कुतूहल से एक दम अपने अञ्चल में धीरे से उसको पकड़ा, लेकिन वह छुड़ाकर भाग गई और मेरी निद्रा भी टूट गई ॥ ३ ॥

विदूषक—(अपने मन में) होगा ऐसा। (प्रकाश में) मित्र ! आज मैंने भी स्वप्न देखा है।

राजा—(प्रत्याशा के साथ) बताओ तो तुम्हारा स्वप्न कैसा है ?

विदूषक—आज ऐसा लगता है मानो स्वप्न में गंगा के प्रवाह में सो गया हूँ और फिर शिवजी के सिर पर लीला में चरण रखने वाली गंगा के जल से जैसे मुझे स्नान करा दिया गया है।

राजा—फिर, फिर ?

विदूषक—फिर शरत् ऋतु में वरसने वाले बादलों में खूब भींगा।

परयाः सा ताडितुमनाः। 'तुं काममनसोरपि' इस सूत्र से मकार का लोप। मोचयित्वा = √मोचि+इ+त्वा–ण्यन्त मुच् धातु से त्वा प्रत्यय ॥ ३ ॥

१. इच्छामनतिक्रम्य यथेच्छम् (अव्ययीभाव) इच्छा के अनुसार।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

राजा—अच्छरिअं !! अच्छरिअं !! तदो तदो ? [**आश्चर्यमाश्चर्यम् !! ततस्ततः ?**]

विदूषकः—तदो सत्तिणक्खत्तगदे भअवदि मत्तण्ड तम्बवण्णाणदीसंगदं समुद्दं गदो महामेहो; जाणे, अहं वि मेहगब्भट्ठिदो गच्छेमि। [**ततः स्वातीनक्षत्रगते भगवति मार्त्तण्डे ताम्रपर्णीनदीसङ्गतं समुद्रं गतो महामेघः; जाने, अहमपि मेघगर्भस्थितो गच्छामि।**]

राजा—तदो तदो ? [**ततस्ततः ?**]

विदूषकः—तदो सो तहिं थूलजलबिन्दूहिं वरिसिदुं पउत्तो। अहं अ रदणाअरसुत्तीहिं मुत्ताणामहेआहिं संपुडं समुग्घाडिअ जलबिन्दूहिं समं पीदो म्हि; ताणं अ दसमासप्पमाणं मोत्ताहलं भविअ गब्भे ट्ठिदो। [**ततोऽसौ तत्र स्थूलजलबिन्दुभिर्वर्षितुं प्रवृत्तः, अहञ्च रत्नाकरशुक्तिभिर्मुक्तानामधेयाभिः सम्पुटं समुद्घाटच जलबिन्दुभिः समं पीतोऽस्मि, तासाञ्च दशमाषप्रमाणं मुक्ताफलं भूत्वा गर्भे स्थितः।**]

राजा—तदो तदो ? [**ततस्ततः ?**]

विदूषकः—

तदो चउस्सट्ठिसु सुत्तिसु ट्ठिदो घणम्बुबिन्दू जिदवंसरोअणो।
सुवत्तुलं णित्तलमच्छमुज्जलं कमेण पत्तो णवमोत्तिअत्तणं॥ ४॥

राजा—आश्चर्य है ! आश्चर्य है ! फिर क्या हुआ ?

विदूषक—तब भगवान् सूर्य के स्वाती नक्षत्र में पहुँचने पर महामेघ ताम्रपर्णी नदी से मिले हुये समुद्र पर गया, याद पड़ता है जैसे मैं भी मेघ के गर्भ में चला जा रहा था।

राजा—फिर, फिर ?

विदूषक—फिर यह वहाँ पर बड़ी-बड़ी बूँदों के साथ बरसने लगा, मुझे भी समुद्र में रहने वाली मुक्ता नाम की सीपियाँ आवरण तोड़ कर जल की बूँदों के साथ पी गई। दश माष (पचास घुँघची) के बराबर आकार का मोती बनकर मैं उनके गर्भ में रहा।

राजा—फिर, फिर ?

टिप्पणी—सम्पुट = आवरण। समुद्घाट्य = निर्भिद्य-तोड़ कर। समम्-साथ। माष = पाँच घुँघुची के बराबर—दशाधंगुञ्जं प्रवदन्ति माषम्। (लीलावती)।

CC-0. Nepal Sanskrit Academy, Kathmandu. Collection

[ततश्चतुःषष्टिषु शुक्तिषु स्थितो घनाम्बुबिन्दुर्जितवंशरोचनः ।
सुवर्तुलं निस्तलमच्छमुज्ज्वलं क्रमेण प्राप्तो नवमौक्तिकत्वम् ।। ४ ।।]

राजा—तदो तदो ? [ततस्ततः ?]

विदूषकः—तदो सोऽहमत्ताणं ताणं सुत्तीणं गब्भगअं मुत्ताहलत्तणेण मण्णेमि । [ततः सोऽहमात्मानं तासां शुक्तीनां गर्भगतं मुक्ताफलत्वेन मन्ये ।]

राजा—तदो तदो ? [ततस्ततः ?]

विदूषकः—तदो परिणदे काले समुद्दाहिंतो कड्ढिदाओ ताओ सुत्तीओ फाडिदाओ अ । अहं चतुस्सट्ठिमुत्तहलत्तणं गदो ठिदो । किणिदो अ एक्केण सेट्ठिणा सुवण्णलक्खं दइअ । [ततः परिणते काले समुद्रात् कर्षितास्ताः शुक्तयः विदारिताश्च । अहं चतुःषष्टिमुक्ताफलत्वं गतः स्थितः । क्रीतश्चैकेन श्रेष्ठिना सुवर्णलक्षं दत्त्वा ।]

राजा—अहो ! विचित्तदा सिविणअस्स । तदो तदो ? [अहो ! विचित्रता स्वप्नस्य । ततस्ततः ?]

अन्वयः—ततः चतुःषष्टिषु शुक्तिषु स्थितः घनाम्बुबिन्दुः जितवंशरोचनः (अहम्) सुवर्तुलम् निस्तलम् अच्छम् उज्ज्वलम् नवमौक्तिकत्वम् क्रमेण प्राप्तः ।

सरलार्थः—ततः चतुःषष्टिषु शुक्तिषु स्थितः घनाम्बुबिन्दुसमानः वंशरोचनातोऽपि उत्कृष्टः अहम् सुवर्तुलं गोलाकारं निस्तलम् कान्तिमत् उज्ज्वलं नवमौक्तिकत्वं क्रमेण प्राप्तः नवमौक्तिकोऽभूवम् ।। ४ ।।

विदूषक—फिर ६४ सीपियों के अन्दर स्थिर जल की बूँद के समान और वंशलोचन से भी उत्कृष्ट मैं गोल और चमकीले नये मोती में धीरे-धीरे बदल गया ।। ४ ।।

राजा—फिर, फिर ?

विदूषक—तब उन शुक्तियों के गर्भ में पड़ा हुआ मैं अपने को मोती समझने लगा ।

राजा—फिर, फिर ?

विदूषक—फिर समय बीतने पर वे सीपियाँ समुद्र से निकाल ली गईं और फोड़ी गईं । मैं चौसठ मोतियों के रूप में था । एक सेठ ने सुवर्णलक्ष देकर मुझे मोल ले लिया ।

राजा—अरे ! बड़ा विचित्र स्वप्न है । फिर क्या हुआ ?

टिप्पणी—चतुःषष्टि = चौसठ । जितं वंशरोचनं येन सः जितवंशरोचनः = तिरस्कृतवंशरोचनः । सुवर्तुलम् = गोल ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

टिप्पणी—कर्षिताः = निकाला । विदारिताः = फोड़ा गया ।

विदूषकः—तदो तेण आणिअ वेधआरएहिं वेधाबिआइं मोत्तिआइं। मम वि ईसीसि वेअणा समुप्पण्णा। [ततस्तेनानीय वेधकारैर्वेधितानि मौक्तिकानि। ममापीषद्वेदना समुत्पन्ना।]

राजा—तदो तदो? [ततस्ततः?]

विदूषकः—तदो [ततः]—

तेणावि मुत्ताहलमण्डलेण एक्केक्कआए दसमासिएणं।
एक्कावली गंठिकमेण गुत्था जा संठिआ कोटिसुवण्णमुल्ला ॥ ५ ॥
[तेनापि मुक्ताफलमण्डलेनैकैकतया दशमाषिकेण।
एकावली[2] ग्रन्थिक्रमेण गुम्फिता सा संस्थिता कोटिसुवर्णमूल्या ॥ ५ ॥]

राजा—तदो तदो? [ततस्ततः?]

विदूषकः—तदो तं करण्डिआए कदुअ साअरदत्तो णाम बाणिओ गदो पञ्चालाहिवस्स सिरिवज्जाउहस्स णअरं कण्णउज्जं णाम; तहिं च सा विक्किणीदा कोडीए सुबणस्स। [ततस्तां करण्डिकायां[3] कृत्वा सागरदत्तो नाम वणिक् गतः पाञ्चालाधिपस्य श्रीवज्रायुधस्य नगरं कान्यकुब्जं नाम। तत्र च सा विक्रीता[4] कोटया सुवर्णस्य।]

सरलार्थः—तेन श्रेष्ठिना अपि मुक्ताफलमण्डलेन एकैकतया प्रत्येकशः दशमाषिकेण दशमाषमितेन एकावली एकसरो हारः ग्रन्थिक्रमेण ग्रन्थानुसारेण गुम्फितः। तस्य च कोटिसुवर्णमासीत् ॥ ५ ॥

विदूषक—तब उसने वेधकारों को बुलाकर मोतियों में छेद कराये। मुझे भी कुछ वेदना हुई।

राजा—फिर, फिर?

विदूषक—तब फिर—

उस सेठ ने भी दस माष के बराबर (पचास पचास घुंघची) मोतियों से एक-एक लड़ वाला हार बनवाया, उसका मूल्य कोटि सुवर्ण था ॥ ५ ॥

राजा—फिर, फिर?

विदूषक—फिर उस हार को करण्डिका में रखकर सागरदत्त नाम का बनिया पाञ्चाल देश के राजा श्रीवज्रायुध के कान्यकुब्ज नगर में गया। उसने वहाँ उस हार को सुवर्ण की एक कोटि में बेच दिया।

---

१. वेधकार = छेद करने वाला। २. एकावली = एक लड़ वाला हार।
३. करण्डिका = एक पात्र का नाम। ४. विक्रीता = बेच दी।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

राजा—तदो तदो ? [ततस्ततः ?]
विदूषकः—तदो अ [ततश्च]—
दट्ठूण थोरत्थणतुंगिमाणं एक्कावलीए तह चंगिमाणं ।
सा तेण दिण्णा दइदाइ कण्ठे रज्जन्ति छेआ समसंगमम्मि ॥ ६ ॥
[दृष्ट्वा स्थूलस्तनतुङ्गिमानमेकावल्यास्तथा चाङ्गिमानम् ।
सा तेन दत्ता दयितायाः कण्ठे रज्यन्ति च्छेकाः समसङ्गमे ॥ ६ ॥]
अवि अ [अपि च]—
णहबहलिअजोण्हाणिब्भरे रत्तिमज्झे
कुसुमसरपहारत्ताससंमीलिदाणं ।
णिहुवणपरिरंभे णिब्भरुत्तुंगपीण-
त्थणकलसणिवेसा पीडिदोहं विबुद्धो ॥ ७ ॥
[नभोबहलितज्योत्स्नानिर्भरे रात्रिमध्ये
कुसुमशरप्रहारत्राससंमिलितयोः ।

अन्वयः—तेन स्थूलस्तनतुङ्गिमानम्, तथा एकावल्याः चङ्गिमानम् दृष्ट्वा सा दयितायाः कण्ठे दत्ता । छेकाः समसंगमे रज्यन्ति ।

व्याख्या—तेन पाञ्चालाधिपेन वज्रायुधेन स्वदयितायाः स्थूलयोः स्तनयोः पयोधरयोः तुङ्गिमानम् पीनत्वम्, तथा एकावल्याः हारस्य चङ्गिमानं सौन्दर्यं च दृष्ट्वा सा एकावली दयितायाः कण्ठे दत्ता । छेकाः विदग्धा समसङ्गमे रज्यन्ति प्रसन्नाः भवन्ति । स्तनयोरेकावलीसङ्गमः आनन्ददायक इत्यर्थः ॥ ६ ॥

व्याख्या—यदा नभसि आकाशे ज्योत्स्नानां चन्द्रिकाणां निर्भरः अतिशयः

राजा—फिर, फिर ?
विदूषक—फिर—
पाञ्चाल देश के राजा वज्रायुध ने अपनी रानी के उठे हुए स्तनों के उभार तथा एकावली हार के सौन्दर्य को देखकर वह हार अपनी रानी के गले में पहना दिया । विद्वान् बराबर का बराबर वाले के साथ संगम देखकर प्रसन्न होते हैं ॥ ६ ॥
और भी—
आकाश में जब खूब चांदनी खिली हुई थी, ऐसी मध्यरात्रि में कामदेव के प्रहार और

टिप्पणी—तुंगस्य भावः = तुंगिमा = ऊँचाई–तुंग शब्द से भावार्थक इमनिच् प्रत्यय । चंगिमा = सौन्दर्य । रज्यन्ति = प्रसन्न होते हैं ॥ ६ ॥
टिप्पणी—ज्योत्स्नानां निर्भरः = ज्योत्स्नानिर्भरः—नभसि बहलितानि ज्योत्स्नानि भरः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

निधुवनपरिरम्भे निर्भरोत्तुङ्गपीन-
स्तनकलशनिवेशात्पीडितोऽहं विबुद्धः ॥ ७ ॥]

राजा—(किञ्चिद्विहस्य विचिन्त्य च)—

सिविणअमिअं असच्चं तं दिट्ठं मेणुसंधमाणस्स ।
पडिसिविणएण तस्स वि णिआरणं तुह अहिप्पाओ ॥ ८ ॥
[स्वप्नमिममसत्यं तत् दृष्टं ममानुसन्दधतः ।
प्रतिस्वप्नेन तस्यापि निवारणं तवाभिप्रायः ॥ ८ ॥]

विदूषकः—भट्टो ठक्कुरो छुहाकिलन्तो बह्मणो, अविणीदहिअआ बालरंण्डा विरहिदो अ माणुसो मणोरधमोदएहिं अत्ताणं विडंबेदि । अवि

प्रसृतः अभवत् तादृशे रात्रिमध्ये कुसुमशरस्य कामस्य प्रहारात् त्रासेन भयेन च सम्मिलितयोः संगतयोः तयोः राजदम्पत्योः निधुवनपरिरम्भे संभोगकालीनालिङ्गने निर्भरोत्तुङ्गयोः नितरामुन्नतयोः पीनयोः स्थूलयोः स्तनकलशयोः निवेशात् सम्पातात् पीडितः अहं विबुद्धः जागरितवान् । यदा रात्रौ राजा स्वदयितां रन्तुमारब्धः, संयोगकाले च तां प्रगाढमालिङ्गितवान् तदा तस्याः स्तनयोः सम्पातादहं पीडितोऽभवम् । अतः सपदि एव जागरितः ॥ ७ ॥

अन्वयः—तत् इमम् असत्यम् दृष्टं स्वप्नम् अनुसन्दधतः मम प्रतिस्वप्नेन तस्य अपि निवारणम् तव अभिप्रायः अस्तीति शेषः ।

सरलार्थः—मया असत्यमेव स्वप्नो दृष्टः, स्वप्रतिस्वप्नकथनेन त्वया तस्य निवारणं कृतमित्यर्थः ॥ ८ ॥

डर से मिले हुये उन राजदम्पती की जब सुरतक्रीडा प्रारम्भ हुई तब आलिंगन में घट के समान खूब उठे हुये स्तनों के बैठ जाने से मुझ पर दबाव पड़ा और मैं जाग गया ॥ ७ ॥

राजा—(कुछ हँसकर और विचार कर)—

मैं इस झूठे स्वप्न का ध्यान कर रहा था । अपने प्रति स्वप्न को सुना कर तूने मुझे स्वप्न के याद करने से भी रोक दिया ॥ ८ ॥

विदूषक—उन्मत्त हुआ राजा, भूख से व्याकुल ब्राह्मण, पुरुषसंसर्ग को चाहने वाली

यस्मिन् तस्मिन् नभोबहलितज्योत्स्नानिर्भरे = आकाशप्रसृतज्योत्स्नातिशये । कुसुमशरस्य प्रहारात् त्रासेन सम्मिलितयोः = कामदेवप्रहारभयसंगतयोः । निधुवनं सम्भोगः तस्मिन् परिरम्भः = निधुवनपरिरम्भः = सुरतालिङ्गनम् । निर्भरोत्तुङ्गयोः = अत्यन्तमुन्नतयोः । विबुद्धः = जागरितः ॥ ७ ॥

टिप्पणी—क्षुधया क्लान्तः = क्षुधाक्लान्तः भूख से थका हुआ । अविनीतं हृदयं यस्याः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अ वअस्स ! पुच्छेमि, कस्स उण एसो पहाओ ? [भ्रष्टो राजा, क्षुधाक्लान्तो ब्राह्मणः, अविनीतहृदया बालरण्डा, विरहितश्च मानुषो मनोरथमोदकैरात्मानं विडम्बयति । अपि च वयस्य ! पृच्छामि, कस्य पुनरेष प्रभावः ?]

राजा--पेम्मस्स । [प्रेम्णः]

विदूषकः—भो ! देवीगदे पणअप्परूढे वि पेम्मे किं त्ति कप्पूरमञ्जरी सव्वंगवित्थारिदलोअणो पिअन्तो विअ अवलोएसि ? किं तदो वि परिहीअमाणगुणा देवी ? [भोः ! देवीगते प्रणयप्ररूढेऽपि प्रेमणि किमिति कर्पूरमञ्जरीं सर्वाङ्गविस्तारितलोचनः पिबन्निव अवलोकयसि ? किं ततोऽपि परिहीयमाणगुणा देवी ?]

राजा—मा एव्वं भण [मैवं भण]—

कदा वि संघडइ कस्स वि पेम्मगण्ठी
एवमेव तत्थ ण हु कारणमत्थि रूअं ।
चङ्गत्तण उण महिज्जदि जं तहिं पि
ता दिज्जए पिसुणलोअमुहेसु मुद्दा ॥ ९ ॥

[कदापि सङ्घटते कस्यापि प्रेमग्रन्थिः
एवमेव तत्र न खलु कारणमस्ति रूपम् ।

अन्वयः—कदा अपि कस्य प्रेमग्रन्थिः एवमेव सङ्घटते, तत्र रूपम् न खलु

धूर्त स्त्री और विरही मनुष्य मन के लड्डुओं से अपने को प्रसन्न रखता है । मित्र ! बताओ तो, यह किसका प्रभाव है ?

राजा—प्रेम का ।

विदूषक—मित्र ! महारानी से इतना प्रेम होने पर भी कर्पूरमञ्जरी को इस तरह देखते हो जैसे कि सारे अंग में आँखे लगाकर उसे पी जाओगे । क्या महारानी के गुण कर्पूरमञ्जरी से कुछ कम हैं ?

राजा—ऐसा मत कहो ।

किसी भी समय किसी का किसी पर प्रेम यों ही हो जाता है, इस प्रेम-बन्धन में सौन्दर्य

सा अविनीतहृदया = पुरुषसंसर्गाभिलषितचित्ता—पुरुषसहवास चाहने वाली । विडम्बयति = धोखा देता है ।

टिप्पणी—पिबन् = पीता हुआ—√पा (पिब्)+अत्–शत्रन्त । परिहीयमाणाः गुणाः यस्याः सा परिहीयमाणगुणा= कम गुण वाली—परि√हा+य+आन—परिपूर्वक हा धातु से कर्मवाच्य में आनच्, म् का आगम ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

चङ्गत्वं पुनर्मृग्यते यत्तत्रापि
तद्दीयते पिशुनलोकमुखेषु मुद्रा ॥ ९ ॥]

विदूषकः—भो ! किं उण एदं पेम्म पेम्मत्ति भणन्ति ?। [भोः ! किं पुनरेतत् प्रेम प्रेमेति भणन्ति ?]

राजा—अण्णोण्णमिलिदस्स मिधुणस्स मअरद्धअसासणेण परूढं पणअग्गंठिं प्पेम्मंत्ति छइल्ला भणन्ति। [अन्योऽन्यमिलितस्य मिथुनस्य मकरध्वजशासने प्ररूढं[1] प्रणयग्रन्थिं प्रेमेति विदग्धा भणन्ति।]

विदूषकः—कीदिसो सो ? [कीदृशः सः ?]

राजा—

जस्सिं विअप्पघडणाइकलंकमुक्को उत्ताणअस्स सरलत्तणमेइ भावो।
एक्कक्कअस्स पसरन्तरसप्पवाहो सिंगारवड्ढिअमणोहवदिण्णसारो ॥१०॥

कारणम् अस्ति। तत्रापि यत् पुनः चङ्गत्वम् मृग्यते, तत् पिशुनलोकमुखेपु मुद्रा दीयते।

सरलार्थः—कस्मिन्नपि काले कस्यापि प्रेमबन्धः कञ्चित् प्रति एवमेव कारणं विना संघटते, अस्मिन् प्रेमबन्धे सौन्दर्यं कारणं न भवति। यथोक्तं भवभूतिना उत्तररामचरिते—'व्यतिषजति पदार्थानान्तरः कोऽपि हेतुर्न खलु बहिरुपाधीन् प्रीतयः संश्रयन्ते। विकसति हि पतङ्गस्योदये पुण्डरीकं द्रवति च हिमरश्मावुद्गते चन्द्रकान्तः॥' तत्रापि प्रेम्णः आन्तरहेतुकत्वेऽपि यत्पुनः सौन्दर्यं मृग्यते अन्विष्यते तत् पिशुनानां लोकानां मुखेषु मुद्रादानाय आवरणदानायैव भवति। पिशुनाः जनाः निन्दां मा कुर्युरिति तेषां मुखबन्धनाय सौन्दर्यादिगुणाः कीर्त्यन्ते ॥ ९ ॥

कारण नहीं होता। फिर भी प्रेम में सौन्दर्य को जो कारण बताया जाता है वह दुष्ट लोगों के मुँह को बन्द करने के लिये ही–दुष्ट लोग जिस किसी से भी प्रेम करने को बुरा न बतायें इसलिये सुन्दरता आदि गुणों का उल्लेख कर दिया जाता है ॥ ९ ॥

विदूषक—यह 'प्रेम-प्रेम' किसे कहा जाता है ?

राजा—एक दूसरे के पास बैठे हुये स्त्री पुरुषों का कामदेव की आज्ञा से उत्पन्न हुआ भाव प्रेम कहलाता है।

विदूषक—वह भाव कैसा होता है ?

टिप्पणी—चङ्गस्य भावः = चङ्गत्वम् = सौन्दर्य। मृग्यते = अन्विष्यते–खोजा जाता है। मुद्रा = पर्दा। आवरणपिशुन = एक दूसरे की चुगली, खाने वाला ॥ ९ ॥

१. प्ररूढ = उत्पन्न।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

[यस्मिन् विकल्पघटनादिकलङ्कमुक्तः आत्मनः सरलत्वमेति भावः ।
एकैकस्य प्रसरद्रसप्रवाहः शृङ्गारवर्द्धितमनोभवदत्तसारः ॥१०॥]

विदूषकः—कधं विअ सो लक्खीअदि ? [कथमिव स लक्ष्यते ?]

राजा—

जाणं सहावपसरन्तसुलोलदिट्ठीपेरन्तलुंठिअमणाणँ परम्परेण ।
वड्ढन्तमम्महविइण्णरसप्पसारो ताणं पआसइ लहुं विअ चित्तभावो ॥११॥
[ययोः स्वभावप्रसरत्सुलोलदृष्टिपर्यन्तलुण्ठितमनसोः परस्परेण ।
वर्धमानमन्मथवितीर्णरसप्रसारस्तयोः प्रकाशते लघुरिव चित्तभावः ॥ ११ ॥]

अन्वयः—यस्मिन् एकैकस्य आत्मनः भावः विकल्पघटनादिकलङ्कमुक्तः प्रसरद्रसप्रवाहः शृङ्गारवर्धितमनोभवदत्तसारः (सन्) सरलत्वम् एति ।

व्याख्या—यस्मिन् प्रेमणि सति एकैकस्य उभयस्य आत्मनः भावः आशयः विकल्पानां घटनादिभिः कलङ्कैः मुक्तः विरहितः, आनन्दस्रोतसः प्रवाहेण च युक्तः तथा शृङ्गारेण वर्धितः उल्लसन् यः कामः तेन उत्कर्षम् प्राप्तः सन् सरलत्वम् आर्जवमेति, सुखदुःखे समे भवतः स भावप्रेमेति कथ्यते ॥ १० ॥

अन्वयः—ययोः परस्परेण स्वभावप्रसरत्सुलोलदृष्टिपर्यन्तलुण्ठितमनसोः वर्धमानमन्मथवितीर्णरसप्रसारः, तयोः चित्तभावः लघुः इव प्रकाशते ।

राजा—जिस भाव के उत्पन्न होने पर एक दूसरे के चित्त के विचार संशय इत्यादि भावों से रहित हो जाते हैं, जिसमें आनन्द का स्रोत-सा बहता है और शृङ्गार से प्रवृद्ध कामदेव के द्वारा जिसमें उत्कर्ष आ जाता है तथा सरलता आ जाती है वह भावप्रेम कहलाता है ॥ १० ॥

विदूषक—वह भाव किस तरह दिखाई पड़ता है !

राजा—आपस में स्वभाव से ही बड़ी और चञ्चल आँखों के कटाक्षों के प्यासे जिन स्त्री पुरुषों में आनन्दातिरेक प्रवृद्ध कामदेव द्वारा उत्पन्न दिखाई पड़ता है, उन स्त्री-पुरुषों के मन का अभिप्राय बहता हुआ-सा प्रकट होता है ॥ ११ ॥

टिप्पणी—विकल्पानां घटनादयः ये कलङ्काः तैः मुक्तः = विकल्पघटनादिकलङ्कमुक्तः = संशयादिदोषविरहितः । प्रसरन् रसप्रवाहः यत्र सः प्रसरद्रसप्रवाहः = प्रवहदानन्दस्रोताः = बहते हुए आनन्द के प्रवाह से युक्त । शृङ्गारेण वर्द्धितः = शृङ्गारवर्धितः, स चासौ मनोभवः शृङ्गारवर्धितमनोभवः, तेन दत्तः सारः यस्य स शृङ्गारवर्धितमनोभवदत्तसारः = शृङ्गार से बढ़े हुये काम ने जिसको उत्कर्ष प्रदान किया है ॥ १० ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

टिप्पणी—स्वभावेन प्रसरन्त्यः सुलोलाश्च या दृष्टयः = स्वभावप्रसरत्सुलोलदृष्टयः,

अवि अ [अपि च]—

अन्तो णिविट्ठमअणविब्भमडम्मरं जं
तं भण्णए अ मअणमण्डणमेत्थ पेम्मं।
दुल्लक्खअं पि जं पअडेइ जणो जअम्मि
तं जाणिमो अ सुबहुलं मअणिन्दजालं ॥ १२ ॥

[अन्तर्निविष्टमदनविभ्रमडम्बरं यत्
तत् भण्यते च मदनमण्डनमत्र प्रेम।
दुर्लक्ष्यमपि यत् प्रकटयति जनो जगति
तज्जानीमश्च सुबहुलं मदनेन्द्रजालम् ॥ १२ ॥]

व्याख्या—परस्परेण अन्योऽन्येन स्वभावतः प्रसरन्त्यः प्रचलन्त्यः सुलोला। सुचञ्चलाः या। दृष्टयः तासां पर्यन्तेषु अपाङ्गावलोकनेषु लुण्ठितमनसोः सतृष्णयो। ययोः दम्पत्योः वर्धमानेन मन्मथेन रसप्रसारः उल्लासातिरेकः वितीर्णः उत्पन्न। दृश्यते, तयोः दम्पत्योः चित्तभावः द्रुत इव प्रकाशते प्रकटीभवति ॥ ११ ॥

अन्वयः—यत् अन्तर्निविष्टमदनविभ्रमडम्बरम्, तत् अत्र मदनमण्डनम् प्रेम भण्यते। जगति जनः दुर्लक्ष्यम् अपि यत् प्रकटयति तत् सुबहुलम् मदनेन्द्रजालम् जानीमश्च।

व्याख्या—अन्तर्निविष्टस्य हृदयङ्गतस्य मदनस्य यत् विभ्रमडम्बरम् प्रियजनवशीकरणहेतुभूतम् विलासाधिक्यम्, तत् अत्र संसारे मदनमण्डनम् कामभूषणं

और भी—

हृदय को प्रभावित किये हुये कामदेव का जो विलासाडम्बर है वह ही इस संसार में प्रेम कहलाता है। संसार में लोग गुप्त बातों को भी इसके प्रभाव से प्रकट कर देते हैं, यह कामदेव की एक बड़ी जादूगरी है ॥ १२ ॥

तासां पर्यन्तेषु लुण्ठितं मनः ययोः तयोः स्वभावप्रसरत्सुलोलदृष्टिपर्यन्तलुण्ठितमनसोः = चञ्चलापाङ्गावलोकनसतृष्णयोः=चञ्चल कटाक्षों द्वारा देखने के लिए लालायित। वर्धमानश्चासौ मन्मथः = वर्धमानमन्मथः. तेन वितीर्णः रसप्रसारः = वर्धमानमन्मथवितीर्णरसप्रसारः = प्रवृद्धकामदेवप्रदत्तोल्लासातिरेकः = बढ़े हुए कामदेव के द्वारा दिया हुआ आनन्दातिरेक। लघुरिव = बहता हुआ सा ॥ ११ ॥

टिप्पणी—अन्तर्निविष्टश्चासौ मदनः = अन्तर्निविष्टमदनः, तस्य विभ्रमडम्बरम् = अन्तर्निविष्टमदनविभ्रमडम्बरम् = हृदयगतमन्मथविलासाधिक्यम्। भण्यते = कहा जाता है। √भण्+य+ते। कर्मवा० वर्तमा०। दुःखेन लक्ष्यं = दुर्लक्ष्यम् = अत्यन्त गुप्त। सुबहुलम् = महत्—बड़ा। मदनस्य इन्द्रजालम् = मदनेन्द्रजालम् = कामस्य लोकप्रतारिणी कपटकरी

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विदूषकः—जइ चित्तगदं पेम्ममणुराअमुप्पादेदि, ता किं कज्जदि मण्डणाडम्वरविडम्बणाए ? [यदि चित्तगतं प्रेम अनुरागमुत्पादयति, तत् किं क्रियते मण्डनाडम्बरविडम्बनया ?]

राजा—वअस्स ! सच्चमिणं [वयस्य ! सत्यमिदम्]—

किं मेहलावलअणेउरसेहरेहिं ? किं चङ्गिमाअ ? किमु मण्डणडम्बरेहिं ?
तं अण्णमत्थि इह किंपि णिअम्बिणीओ जेणं लहन्ति सुहअत्तणमञ्जरीओ ॥१३॥
[किं मेखलावलयनूपुरशेखरैः ? किं चङ्गिमत्वेन ? किमु मण्डनाडम्बरैः ?
तदन्यदस्तीह किमपि नितम्बिन्यो येन लभन्ते सुभगत्वमञ्जरीः ॥ १३ ॥]

प्रेम भण्यते कथ्यते । जगति जनः दुर्लक्ष्यमपि लक्षयितुमशक्यमपि यत् प्रकटयति प्रकाशते तत् सुबहुलं सुमहत् मदनस्य इन्द्रजालं लोकप्रतारिणीं कपटविद्यां जानीमः मन्यामहे ॥ १२ ॥

अन्वयः—मेखलावलयनूपुरशेखरैः किम्, चङ्गिमत्वेन किम्, मण्डनाडम्बरैः किमु, येन नितम्बिन्यः सुभगत्वमञ्जरीः लभन्ते, इह तत् अन्यत् किमपि अस्ति ।

सरलार्थः—मेखलावलयनूपुरशेखरैः किमपि फलं न, सौन्दर्यमपि न किमपि प्रयोजनं साधयति, मण्डनाडम्बरैः अन्यैः प्रसाधनैः अपि न किमपि कार्यं सिध्यति । येन कारणेन कामिन्यः सौभाग्यकलाः लभन्ते प्राप्नुवन्ति, तदत्र संसारे किमपि अन्यदेवास्ते, तारामैत्री चक्षूराग एव कामिनीषु सौन्दर्यसृष्टिं करोति ॥ १३ ॥

विदूषक—अगर हृदय का प्रेम ही आसक्ति उत्पन्न करता है, तो अलङ्कारों की योजना में क्यों बेकार परिश्रम किया जाता है ?

राजा—मित्र ! यह सत्य है—

करधनी, कङ्गन, पायजेब और सिर के आभूषण से कुछ नहीं होता है। सौन्दर्य भी कहीं-कहीं व्यर्थ रहता है। बाह्य श्रृङ्गार भी व्यर्थ है। संसार में यह तो कोई और ही चीज है जिससे स्त्रियाँ आकर्षक लगती हैं ॥ १३ ॥

विद्या । जानीमः = जानते हैं √ ज्ञा <ना-मः = जानीमः–ज्ञा को जा आदेश, ना प्रत्यय उत्तमपुरुष बहुवचन ॥ १२ ॥

टिप्पणी—मण्डनानाम् आडम्बरः = मण्डनाडम्बरस्तस्य विडम्बनया = प्रसाधनप्रयासेन । मेखला = करधनी । वलय = कङ्गन । नूपुर = पायजेब । चङ्गिमत्वम् = सौन्दर्य । प्रशस्तौ नितम्बौ स्तः यासां ताः नितम्बिन्यः–प्राशस्त्य में इन् प्रत्यय, सुभगत्वमञ्जरीः = सौभाग्यकलाः ॥ १३ ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अवि अ [अपि च]---

किं गेअणिट्टविहिणा ? किमु वारुणीए ?
धूवेण किं अगुरुणा ? किमु कुंकुमेण ?
मिट्ठत्तणे महिअलम्मि ण किं वि अण्णं
रुच्चिस्स अत्थि सरिसं पुणु माणुसस्स ? ॥ १४ ॥

[किं गेयनृत्यविधिना ? किमु वारुण्या ? धूपेन किमगुरुणा किमु कुङ्कुमेन ।
मधुरत्वे महीतले न किमप्यन्यत् रुचेरस्ति सदृशं पुनर्मानुषस्य ॥१४॥]

अवि अ [अपि च]--

जा चक्कवट्टिघरिणी जणगेहिणी वा
पेम्मम्मि ताण ण तिलं वि विसेसलाहो ।
जाणे सिरीअ जइ क्रिज्जइ को वि भावो
माणिक्कभूसणणिअसणकुङ्कुमेहिं ॥ १५ ॥

[या चक्रवर्त्तिगृहिणी जनगेहिनी वा
प्रेम्णि तयोर्न तिलमात्रमपि विशेषलाभः ।

सरलार्थः—गानेन नृत्येन च न किमपि सिध्यति, वारुण्या मदिरया चापि न किमपि प्रयोजनम् । अगुरोः धूपोऽपि निरर्थकः । कुङ्कुमरागोऽपि निष्फल एव । मानुषस्य रुचेः सदृशं किमपि वस्तु मधुरत्वे पृथिव्यां न तिष्ठति । यत्र मनुष्यः अनुरक्तो भवति तदेव तस्मै रोचते ॥ १४ ॥

अन्वयः—या चक्रवर्तिगृहिणी, (या) वा जनगेहिनी, तयोः प्रेम्णि तिलमात्रमपि विशेषलाभः न (अस्ति) । यदि श्रिया कोऽपि भावः क्रियते, (तदा) माणिक्यभूषणनिवसनकुङ्कुमैः (स भवति) इति जाने ।

और भी—

गाने और नाचने से कुछ नहीं होता है, मदिरा भी बेकार है, अगुरु का सुगन्धित धुआँ भी निरर्थक है, कुङ्कुमराग से भी कुछ लाभ नहीं । मनुष्य की रुचि के समान पृथ्वी पर कोई भी वस्तु मधुर नहीं है ॥ १४ ॥

और भी—

चाहे चक्रवर्ती राजा की रानी हो, या साधारण पुरुष की स्त्री हो, इन दोनों के प्रेम में

टिप्पणी—गेयम् च नृत्यं च गेयनृत्ये तयोः विधिना = गेयनृत्यविधिना = नाचने-गाने से । वारुणी = मदिरा । अगुरु = एक गन्धयुक्त लकड़ी ॥ १४ ॥

टिप्पणी—माणिक्यभूषणं निवसनं कुङ्कुमश्च तैः माणिक्यभूषणनिवसनकुङ्कुमैः । जन-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

जाने श्रिया यदि क्रियते कोऽपि भावो
माणिक्यभूषणनिवसनकुङ्कुमैः   ॥ १५ ॥]

अवि अ [अपि च]—

किं लोअणेहिँ तरलेहिँ ? किमाणणेण
चन्दोवमेण ? थणएहिँ किमुण्णएहिँ ?
तं किं पि अण्णामिह भूवलए णिमित्तं
जेणंगणाउ हिअआउ ण ओसरन्ति ॥ १६ ॥

[किं लोचनैस्तरलैः ? किमाननेन चन्द्रोपमेन ? स्तनैः किमुन्नतैः ?
तत्किमप्यन्यदिह भूवलये निमित्तं येनाङ्गना हृदयान्नापसरन्ति ॥ १६ ॥]

सरलार्थः—या चक्रवर्तिनः राज्ञः गृहिणी महिषी, या वा सामान्यजनपत्नी, तयोः प्रेम्णि अणुमात्रमपि प्रभेदो न भवति। यदि सौन्दर्यशोभया कोऽपि भावः प्रणयः क्रियते तदा स माणिक्यभूषणेन निवसनेन कुङ्कुमं न च भवति इति जाने मन्ये ॥ १५ ॥

अन्वयः—तरलैः लोचनैः किम्, चन्द्रोपमेन आननेन किम् ? उन्नतैः स्तनैः किम् ? इह भूवलये तत् किमपि अन्यत् निमित्तम्, येन अङ्गनाः हृदयात् न अपसरन्ति ।

सरलार्थः—चञ्चलैः नेत्रैः किं प्रयोजनम् ? चन्द्रसदृशेन मुखेनापि किम् ? उच्चैः स्तनैरपि न कोऽपि गुणः। अस्मिन् भूमण्डले किमप्यन्यदेव कारणं येन नार्यः नराणां हृदयात् न निर्गच्छन्ति। पुरुषाणां हृदयानि वशीकुर्वन्ति ॥ १६ ॥

तिलभर भी भेद नहीं होता है। अगर सौन्दर्य-शोभा से कोई भाव होता है तो वह मानसिक, आभूषण, सुन्दर वस्त्र और कुङ्कुम से होता है—ऐसा मैं समझता हूँ ॥ १५ ॥

और भी—

चञ्चल नेत्रों से क्या ? चन्द्रमा जैसे मुख से भी कोई लाभ नहीं। उन्नत उरोजों से भी क्या प्रयोजन। इस संसार में कोई और ही कारण है जिससे स्त्रियाँ पुरुष के हृदयों को अपने वश में कर लेती हैं ॥ १६ ॥

गेहिनी = साधारण पुरुष की स्त्री। तिलमात्रम् = लेशमात्र भी। चक्रवर्तिगृहिणी = चक्रवर्ती राजा की रानी ॥ १५ ॥

टिप्पणी—तरल = चञ्चल। चन्द्रः अस्ति उपमा यस्य तेन चन्द्रोपमेन = शशिसदृशेन अपसरन्ति = हटती हैं, अप √सृ + अ + अन्ति ॥ १६ ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विदूषकः—एव्वं णेदं, किं उण उण्णं पि मे कधेसु, जं, कुमारत्तणे माणु-सस्स अमणोज्जमेतस्मि वि तरुणत्तणे चङ्गत्तणं वड्ढदि। [एवमेतत्, किं पुनरन्यदपि मे कथय, तत् कुमारत्वे मानुषस्यामनोज्ञम्, एतस्मिन्नपि तारुण्ये चङ्गत्वं वर्द्धते ?]

राजा—

णूणं दुवे इह पजावइणो जअम्मि जे देहणिम्मवणजोव्वणदाणदक्खा।
एक्को घडेइ पढमं कुमरोणमङ्गं उक्कारिऊण पअडेइ पुणो दुदीओ ॥१७॥
[नूनं द्वाविह प्रजापती जगति यौ देहनिर्माणयौवनदानदक्षौ।
एको घटयति प्रथमं कुमारीणामङ्गम् उत्कीर्य्य प्रकटयति पुनर्द्वितीयः ॥ १७ ॥]

तेण च [तेन च]—

रणिअवलअकञ्चीणेउरावासलच्छी मरगअमणिमाला गोरिआ हारलट्ठी।
हिअअहरणमन्तं जोव्वणं कामिणीणं जअइ मअणकण्डं छट्ठअं वड्ढअं अ॥१८॥

अन्वयः—इह जगति द्वौ प्रजापती, यौ देहनिर्माणयौवनदानदक्षौ (स्तः)। एकः कुमारीणाम् अङ्गम् प्रथमं घटयति, द्वितीयः पुनः उत्कीर्य्य प्रकटयति।

सरलार्थः—अस्मिन् संसारे द्वौ विधातारौ स्तः, यौ देहरचनायां यौवनदाने च प्रवीणौ स्तः, अनयोः एकः ब्रह्मा प्रथमं कुमारीणां केवलं शरीरमेव रचयति, पुनः द्वितीयः कामः अङ्गानि उन्मील्य प्रकाशयति। ब्रह्मा तु केवलं शरीरं रचयत्येव, कामस्तु शरीरे सौन्दर्यसृष्टिं करोति। ब्रह्मापेक्षया कामः निपुणतर इति भावः ॥ १७ ॥

विदूषक—यह तो ऐसा है ही, कुछ और भी मुझे बताओ। यह क्या बात है कि जो (मनुष्य) कुमारावस्था में सुन्दर नहीं लगता, वह युवावस्था में सुन्दर हो जाता है ?

राजा—इस संसार में दो प्रजापति हैं, जो शरीर बनाने में और यौवन देने में चतुर हैं। इनमें ब्रह्मा तो केवल कुमारियों का शरीर ही बनाता है किन्तु शरीर का विकास तो कामदेव के द्वारा ही होता है ॥ १७ ॥

टिप्पणी—तरुणस्य भावः=तारुण्यम्–युवावस्था-तरुण शब्द से भावार्थक ष्यञ् प्रत्यय।
टिप्पणी—घटयति = बनाता है घट् चेष्टायाम् (भ्वादि आत्मने०) से ण्यन्त में लट् लकार। उत्कीर्य = खिलाकर, उन्मील्य–उत्√कॄ+य ल्यबन्त। ॠ के ॠ को इर् आदेश।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

[रणितवलयकाञ्चीनूपुरावासलक्ष्मीर्मरकतमणिमाला गौरिका हारयष्टिः ।
हृदयहरणमन्त्रं यौवनं कामिनीनां जयति मदनकाण्डः षष्ठको वर्द्धकश्च ॥१८॥]

तहा अ [तथा च]—

अङ्गं लावण्णपुण्णं सवणपरिसरे लोअणा हारतारा
वच्छंथोरत्थणिल्लं तिवलिवलइअं मुट्ठिगेज्झं च मज्झं ।
चक्काआरो ण्वि अम्बो तरुणिमसमए किं णु अण्णेण कज्जं ?
पञ्चेहिं जेव्व वाला मअणजअमहावेजअन्तीउ होन्ति ॥ १९ ॥

[अङ्गं लावण्यपूर्णं श्रवणपरिसरे लोचने हारतारे
वक्षः स्थूलस्तनं त्रिवलिवलयितं मुष्टिग्राह्यञ्च मध्यम् ।

अन्वयः—रणितवलयकाञ्ची नूपुरावासलक्ष्मीः (तिष्ठतु), मरकतमणिमाला गौरिका हारयष्टिः (तिष्ठतु), षष्ठकः वर्धकः च मदनकाण्डः कामिनीनां हृदय-हरणमन्त्रम् यौवन जयति ।

व्याख्या—रणितानां शिञ्जितानां वलयानां कङ्कणानां काञ्चीनाम् रशनानाम् नूपुराणां च आवासेन धारणेन या लक्ष्मीः शोभा सा तिष्ठतु तावत्, न तस्याः काप्यावश्यकता । एवमेव मरकतमणीनां माला, गौरिका काञ्चनी हारयष्टिर्वा तिष्ठतु । षष्ठः वर्धकः प्रबलतरः च मदनशरः इव इदं हृदयवशीकरणमन्त्रम् कामिनीनां यौवनं जयति सर्वोत्कर्षेण वर्तते । यद्यपि मदनस्य अन्येऽपि पञ्चशराः सन्ति, तथापि यौवनरूपोऽयं षष्ठः शरः प्रबलतरः, सर्वं जगच्च वशीकरोति ॥१८॥

अन्वयः—तरुणिमसमये लावण्यपूर्णम् अङ्गम्, हारतारे श्रवणपरिसरे लोचने,

---

और उससे—

बजते हुए कङ्कण, करधनी और पायजेबों के पहिनने से उत्पन्न होने वाली शोभा तो कुछ भी नहीं है, मरकतमणियों की माला तथा सोने का हार भी रहने दो । हृदय को वश में करने वाला तथा कामदेव के छठे और प्रबल बाण के समान कामिनियों का यह यौवन ही सर्वोत्कृष्ट है ॥ १८ ॥

वैसे भी—

युवावस्था में सुन्दरियों का शरीर लावण्य से भरपूर हो जाता है, आँखें भी आकर्षक

टिप्पणी—रणित = बजता हुआ । आवासः = धारण करना । गौरिका = सोने का । मदन काण्ड = काम का बाण । षण्णां पूरणः = षष्ठः, स्वार्थ में क प्रत्यय–षष्ठकः = छठा । वर्धकः = प्रबल ॥ १८ ॥

टिप्पणी—लावण्येन पूर्णम्–लावण्यपूर्णम्—लावण्यपूर्णम् = कान्तियुक्तम् । हाराः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

चक्राकारो नितम्बस्तरुणिसमये किं त्वन्येन कार्यम् ?
पञ्चभिरेव बाला मदनजयमहावैजयन्त्यो भवन्ति ॥ १९ ॥]

(नेपथ्ये)

सहि कुरंगिए ! इमिणा सिसिरोवआरेण णलिणीविअ कामं किलिस्सामि [सखि कुरङ्गिके ! अनेन शिशिरोपचारेण नलिनीव कामं क्लाम्यामि]—

विसं व्व विसकन्दली विसहरो व्व हारच्छडा
वअस्समिव अत्तणो किरइ तालवेण्टाणिलो।
तहा अ करणिग्गअं जलइ जन्तधाराजलं
ण चन्दणमहोसहं हरइ देहदाहं च मे ॥ २० ॥

स्थूलस्तनम् वक्षः, त्रिवलिवलयितं मुष्टिग्राह्यम् च मध्यम्, चक्राकारः नितम्बः, (एभिः) पञ्चभिः एव बालाः मदनजयमहावैजयन्त्योः भवन्ति, अन्येन किं न कार्यम् ?

सरलार्थः—युवावस्थायाम् कामिनीनाम् अङ्गम् लावण्येन पूर्णं भवति, आकर्षके कर्णपर्यन्तमायते च नयने भवतः, वक्षसि पीनौ पयोधरौ च समागच्छतः, कटिप्रदेशश्च त्रिवलिभिः तिसृभिः रेखाभिः वलयितं वेष्टितं मुष्टिमेयश्च सञ्जायते, नितम्बौ च मण्डलाकारौ सुवर्तुलौ परिणमतः, एभिः पञ्चभिः एव कामिन्यः मदनस्य जगद्विजये महावैजयन्त्यः महापताकाः भवन्ति, अन्येन यौवनादन्येन किमपि प्रयोजनं नेत्यर्थः ।

और बड़ी लगने लगती हैं, वक्षःस्थल पर स्तन खूब उभर आते हैं, कमर पतली हो जाती है तथा उस पर त्रिवलियाँ पड़ जाती हैं, नितम्बभाग खूब सुडौल और गोल हो जाता है। इन पाँच अङ्गों से ही बालायें कामदेव के संसार-विजय में पताका का काम करती हैं अर्थात् सबसे आगे रहती हैं। किसी और की आवश्यकता ही क्या है ॥ १९ ॥

(नेपथ्य में)

सखि ! कुरंगिके ! इस शिशिरोपचार से कमलिनी की तरह अत्यन्त उकता गई हूँ।

तारा ययोः ते हारतारे = उत्कृष्टकनीनिके, आकर्षके । श्रवणपरिसरे = कान तक खींचे हुये। स्थूलौ स्तनौ यस्मिन् तत् स्थूलस्तनम् = उठे हुए स्तनों वाला । मुष्टिना ग्राह्यम् = मुष्टिग्राह्यम् = मुट्ठी के बराबर । त्रिवलिवलयितम् = तीन रेखाओं से युक्त । चक्रस्येव आकारो यस्य सः चक्राकारः = गोल, सुडौल । मदनस्य मदनकर्तृकस्य जये महावैजयन्त्यः = मदनजयमहापताकाः ॥ १९ ॥

टिप्पणी—शिशिरोपचारः = ठण्डक पहुँचाने का उपाय । कामम् = अत्यन्त । क्लाम्यामि—√क्लम् + य + मि—(दिवादि—श्यन् । लट् लकार) उकताती हूँ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विषमिव बिसकन्दली विषधर इव हारच्छटा
वयस्यमिवात्मनः किरति तालवृन्तानिलः।
तथा च करनिर्गतं ज्वलति यन्त्रधाराजलं
न चन्दनमहौषधं हरति देहदाहं च मे ॥ २० ॥]

विदूषकः—सुदं पिअवअस्सेण ? भरिदा कण्णा पीऊसगण्डूसेहिं; ता किं—अज्जवि उपक्खीअदि घणघम्मेण किलिमंती मुणालिआ ? गाढ-कड्ढणदुस्सहेण सलिलेण सिञ्चिज्जन्ती केलिकुङ्कुमत्थली ? छम्मासिअमोत्ति-आणं झडित्ति फुडती एक्कावलिआ ? गण्ठिवण्णकेदारिआ लण्ठिज्जती गन्धहरिणेण ? ता सच्चं दे सिविणअं संपण्णं। एहि, पविसम्ह। उट्ठि-ज्जदु मअरद्धअपदाआ। पअट्टदु कण्ठकुहरम्मि पञ्चमहुंकाराणां रिच्छोली। थक्कन्तु बाप्फप्पवाहा। मन्थरिज्जन्तु णीसासप्पसरा। लहदु लावण्णं पुणो णवभावं। ता एहि, खिडक्किआदुआरेण प्पविसम्ह। [श्रुतं प्रियवय-स्येन ? भृतौ कर्णौ पीयूषगण्डूषैः; तत् किमद्यापि उपेक्ष्यते घनघर्मेण क्लाम्यन्ती

अन्वयः—बिसकन्दली विषमिव, हारच्छटा विषधर इव। तालवृन्तानिलः आत्मनः वयस्यमिव किरति। तथा करनिर्गतम् यन्त्रधाराजलम् ज्वलति। चन्दन-महौषधं च मे देहदाहम् हरति।

सरलार्थः—मृणाललता विषमिव मे प्रतीयते, हारच्छटा हारावली सर्प इव मे प्रतिभाति। तालवृन्तेन व्यजनेन अभिव्यक्तः अनिलः आत्मनः स्वरूपं वयस्यम् सखायम् अग्निमिव किरति वर्षति। तथा युष्माकं करेभ्यः निःसृतं यन्त्रधाराजलं तपति। चन्दनलेपश्च मे शरीरसन्तापं न हरति न शमयति। विभिन्नाः शीतोप-चाराः विरुद्धमेव प्रभावमुत्पादयन्ति ॥ २० ॥

कमल का नाल विष की तरह मालूम पड़ता है, हार साँपों की तरह लगते हैं। पंखों की हवा भी अपने मित्र अग्नि को ही फैलाती है। यन्त्रधाराओं का जल भी तप रहा है। चन्दन का लेप भी शरीर का ताप दूर नहीं करता है ॥ २० ॥

विदूषक—क्या प्रिय मित्र ने सुना ? कान जैसे अमृत रस से भर गये हों। तीव्र धूप से मुरझाती हुई मृणालिका की क्या अब भी उपेक्षा की जायगी ? खूब गरम और न सहने

टिप्पणी—बिसकन्दली = कमल का नाल। तालवृन्तानिलः = पंखे की हवा। किरति= बिखेरता है—√कृ+अ+ति। ऋ को इर् हो गया, तुदादि-लट् लकार। चन्दनमेव महौषधम् = चन्दनमहौषधम् ॥ २० ॥

टिप्पणी—पीयूषस्य गण्डूषाः, तैः पीयूषगण्डूषैः = अमृत के रस से। भृतौ = भर गये।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मृणालिका ? गाढक्वथितदुःसहेन सलिलेन सिच्यमाना केलिकुङ्कुमस्थली ? षाण्मासिकमौक्तिकानां झटिति स्फुटन्ती एकावली ? ग्रन्थिपर्ण-केदारिका लुण्ठ्यमाना गन्धहरिणेन ? सत् सत्यं ते स्वप्नं सम्पन्नम् । एहि, प्रविशावः उत्थाप्यतां मकरध्वजपताका । प्रवर्त्ततां कण्ठकुहरे पञ्चमहुङ्काराणां रचना स्तोकीक्रियन्तां बाष्पप्रवाहाः । मन्थरीक्रियन्तां निःश्वासप्रसराः । लभतां लावण्यं पुनर्नवभावम् । तदेहि, खिडक्किकाद्वारेण प्रविशावः ।]

(इति प्रविशतः)

(ततः प्रविशति नायिका कुरङ्गिका च)

नायिका—(ससाध्वसं स्वगतम्) अम्मो ! किं एसो सहसा गअणङ्गणादो अवदीण्णो पुण्णिमाहरिणंको ? किं वा तुट्ठेण णीलकण्ठेग णिअदेहं लंभिदो मणोहओ ? किं वा हिअअस्स दुज्जणो णअणाणं सज्जणो जणो मं

योग्य जल से सींची जाती हुई यह क्रीडाभूमि कब तक उपेक्षित रहेगी ? उत्कृष्ट मोतियों को एक दम गिराता हुआ यह हार कब तक उपेक्षित रहेगा ? ग्रन्थिपर्णों की यह क्यारी कस्तूरी मृग से बर्बाद होती हुई कब तक देखी जायगी ? तुम्हारा स्वप्न तो सच्चा ही हो गया । आओ, चलें । कामदेव के झण्डे को उठायें । कोयल की पुकार शुरू होने दो । इसके आंसुओं को रोकें । इसका चित्त शान्त करें । लावण्य फिर से नया हो । आओ, खिड़की के द्वार से अन्दर घुसें ।

(अन्दर जाते हैं)

(तब नायिका और कुरङ्गिका रंगमंच पर आती हैं)

नायिका—(घबराहट के साथ अपने मन में) अरे ! यह एकाएक आसमान से

उपेक्ष्यते = उपेक्षा की जाती है—कर्मवाच्य लट् लकार । क्लाम्यन्ती = मुरझाती हुई √क्लम् + य + अत् (शत्रन्त-स्त्रीलिंग) । सिच्यमानाः=सींची जाती हुई √सिच् + य + आनशानच् प्रत्यय म् का आगम कर्मवाच्य । केलिकुङ्कुमस्थली = क्रीडा करने की भूमि । षाण्मासिकमौक्तिक = छः महीने में तैयार हुई मोती, अर्थात उत्कृष्ट मोती । ग्रन्थिपर्णकेदारिका = एक प्रकार के सुगन्धित पत्तों की क्यारी । लुण्ठ्यमाना = लुटती हुई । उत्थाप्यताम् = उठानो चाहिये । उद् √स्थापि + य + ताम्—ण्यन्त कर्मवाच्य से लोट् लकार । स्तोकीक्रियन्ताम् + कम करने चाहिये । √स्तोकीकृ च्विप्रत्ययान्त से कर्मवाच्य में लोट् लकार प्रथमपुरुष का बहुवचन । मन्थरीक्रियन्ताम्—धीमी करो—√मन्थरीकृ से कर्मवाच्य में लोट् लकार, प्रथम पुरुष का बहुवचन । खिडक्किका = खिड़की ।

टिप्पणी—साध्वसम् = भय, [illegible] । अवतीर्णः = उतरा अव + √तॄ + त = क

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

संभावेदि ? (प्रकाशम्) सहि कुरङ्गिए ! इन्दजालं विअ पेक्खामि। [अहो ! किमेष सहसा गगनाङ्गनादवतीर्णः पूर्णिमाहरिणाङ्क ? किं वा तुष्टेन नीलकण्ठेन निजदेहं लम्भितो मनोभवः ? किं वा हृदयस्य दुर्जनो नयनानां सज्जनो जनो मां सम्भावयति ? (प्रकाशम्) सखि कुरङ्गिके ! इन्द्रजालमिव पश्यामि ।]

विदूषकः—(राजानं हस्ते गृहीत्वा) भोदि ! सच्चं इन्दजालं संपण्णं । [भवति ! सत्यमिन्द्रजालं सम्पन्नम् !]

(नायिका लज्जते)

कुरङ्गिका—सहि कप्पूरमञ्जरि ! अब्भुट्ठाणेण संभावेहि भट्टारअं। [सखि कर्पूरमञ्जरि ! अभ्युत्थानेन सम्भावय[1] भट्टारकम् ।]

(नायिका उत्थातु[2]मिच्छति)

राजा—(हस्तेन गृहीत्वा)—

उट्ठिऊण थणभारभंगुरं मा मिअंकमुहि ! भञ्ज मज्झअं ।
तुज्झ ईरिसणिवेसदंसणे लोअणाणँ मअणो पसीअउ ॥ २१ ॥
[उत्थाय स्तनभारभङ्गुरं मा मृगाङ्कमुखि ! भञ्जय मध्यम् ।
तवेदृशनिवेशदर्शनाल्लोचनयोर्मदनः प्रसीदतु ॥ २१ ॥]

अन्वयः—हे मृगाङ्कमुखि ! उत्थाय स्तनभारभङ्गुरं मध्यम् मा भञ्जय । तव ईदृशनिवेशदर्शनात् (मम) लोचनयोः मदनः प्रसीदतु ।

पूर्णिमा का चन्द्रमा कैसे उतर आया ? क्या शिवजी ने प्रसन्न होकर कामदेव को उसका शरीर दे दिया ? क्या मेरे हृदय को चुराने वाला और आंखों को तृप्त करने वाला कोई मुझे प्रसन्न कर रहा है ? (प्रकट में) सखि कुरङ्गिके ! मैं तो जादू-सा देखती हूँ ।

विदूषक—(राजा का हाथ पकड़ कर) वस्तुतः इन्द्रजाल ही हो गया ।

(नायिका शर्माती है)

कुरङ्गिका—सखी कर्पूरमञ्जरी ! उठकर महाराज का स्वागत करो ?

(नायिका उठना चाहती है)

राजा—(हाथ पकड़ कर)—

अवतीर्ण-त को न आदेश-ऋ को ईर् = तीर्ण । पूर्णिमाहरिणांकः=पूर्णिमा का चन्द्रमा । नीलकण्ठः = शिवजी । लम्भितः = प्राप्त कराई । इन्द्रजालम् = जादू । हृदयस्य दुर्जनः = हृदय को चुराने वाला ।

१. सम्भावय = आदर करो-सम् √भावि से लोट लकार, मध्यमपुरुष एकवचन ।

२. उत्थातुम्—उठने को-उद् √स्था + तुम् = उत्थातुम्-तुमुन्नन्त ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अवि अ [अपि च]—

जिस्सा पुरो ण हरिदा दलिआ हलिद्दा
रोसाणिअं ण कणकं ण अ चम्पआइं।
ताइं सुवण्णकुसुमेहिं विलोअणाइं
अच्चेमि जेहिं हरिणच्छ! तुमंसि दिट्ठा ॥ २२ ॥

[यस्याः पुरो न हरिता दलिता हरिद्रा
उज्ज्वलीकृतं न कनकं न च चम्पकानि।
ते सुवर्णकुसुमैर्विलोचने
अर्चयामि याभ्यां हरिणाक्षि ? त्वमसि दृष्टा ॥ २२ ॥]

सरलार्थः—हे चन्द्रानने ! उत्थानेन स्तनयोः भारेण भङ्गप्रवणं कटिदेशम् मा भग्नं कुरु। त्वाम् ईदृश्यामवस्थायां दृष्ट्वा मम नेत्रे प्रसादमनुभवतः ॥ २१ ॥

अन्वयः—हे हरिणाक्षि ! यस्याः पुरः दलिता हरिद्रा न हरिता, कनकम् न उज्ज्वलीकृतम्, चम्पकानि च न, सा त्वं याभ्यां दृष्टा असि, ते विलोचने सुवर्णकुसुमैः अर्चयामि।

सरलार्थः—हे मृगनयने ! यस्याः तव अग्रतः पिष्टा हरिद्रा अपि न हरिद्रात्वेन गणनीया, सुवर्णमपि च न उज्ज्वलं प्रतिभाति, चम्पकपुष्पाणि च परिहीनानि दृश्यन्ते, स त्वं मया याभ्यां मल्लोचनाभ्यां दृष्टा असि, ते मदीये लोचने अहं सुवर्णकुसुमैः पूजयामि। लब्धं मम नेत्राभ्याम् साफल्यमिति भावः ॥ २२ ॥

अयि चन्द्रमुखी ! मेरे स्वागत के लिये उठ कर स्तनों के भार से झुकी हुई अपनी कमर को मत तोड़ो। तुमको इस अवस्था में देखकर ही मेरे नेत्र प्रसन्न हो रहे हैं ॥ २१ ॥

और भी—

अयि हरिनी से नयनोंवाली ! तेरे सामने पिसी हुई हल्दी भी कुछ नहीं है, साफ किया हुआ सोना भी तेरे सौन्दर्य के सामने तुच्छ है, चम्पा के फूल भी तेरी तुलना नहीं कर सकते। मेरी जिन आंखों ने तुझ को देखा है, उनकी मैं सुवर्ण के फूलों से पूजा करूँगा ॥२२॥

टिप्पणी—स्तनयोः भारः=स्तनभारः, तेन भङ्गुरम् = स्तनभारभङ्गुरम् = स्तनभारभुग्नम्। मृगस्य अङ्कः अस्ति स मृगाङ्कश्चन्द्रः, तस्य इव मुखं यस्याः सा तत्सम्बुद्धौ मृगाङ्कमुखि ! चन्द्रमुखि। मदनः इच्छा। प्रसीदतु = पूरी हो ॥ २१ ॥

टिप्पणी—दलिता = पिसी हुई। हरिद्रा = हल्दी। अर्चयामि = पूजा करता हूँ, √अर्च पूजायाम् (चुरादि)। हरिणाक्षि = हिरन जैसे नेत्रों वाली, हरिणस्येव अक्षिणी यस्याः तत्सम्बुद्धौ हरिणाक्षि-मृगनयने ॥ २२ ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विदूषकः--गब्भघरवासेण सेअसलिलसित्तगत्ता संभूदा तत्थभोदी कप्पूरमञ्जरी; ता इमं सिचअंचलेण वीजइस्सं दाव। (तथा कुर्वन्)। हा ! हा ! कधं वत्थञ्चलपवणेण णिव्वणो प्पदीवो। (विचिन्त्य स्वगतम्)। भोदु, लीलोज्जाणं जेव्व गच्छम्ह। (प्रकाशम्)। भो अंधआरणच्चिदं वट्टदि, ता णिक्कमम्ह सुरंगामुहेण जेव्व पमदुज्जाणं दाव। [गर्भगृहवासेन स्वेदसलिलसिक्तगात्रा सम्भूता तत्रभवती कर्पूरमञ्जरी; तदिमां सिचयाञ्चलेन वीजयिष्यामि तावत्। (तथा कुर्वन्) हा ! हा ! कथं वस्त्राञ्चलपवनेन निर्वाणः प्रदीपः। (विचिन्त्य स्वगतम्) भवतु, लीलोद्यानमेव गच्छामः। (प्रकाशम्) भोः ! अन्धकारनृत्यं वर्तते, तन्निष्क्रमामः सुरङ्गामुखेनैव प्रमदोद्यानं तावत्।]

(सर्वे निष्क्रमणं नाटयन्ति)

राजा—(कर्पूरमञ्जरीं करे धृत्वा)—

मज्झ हत्थट्ठिदपाणिपल्लवा ईस संचरणबन्धुरा भव।
जं चिराअ कलहंसमण्डली होउ केलिगमणम्मि दुब्भगा ॥ २३ ॥
[मम हस्तस्थितपाणिपल्लवा ईषत्सञ्चरणबन्धुरा भव।
यच्चिराय कलहंसमण्डली भवतु केलिगमने दुर्भगा ॥ २३ ॥]

अन्वयः—मम हस्तस्थितपाणिपल्लवा ईषत्सञ्चरणबन्धुरा भव। यत् कलहंसमण्डली चिराय केलिगमने दुर्भगा भवतु।

सरलार्थः—मया तव करकिसलयः गृहीतोऽस्ति, त्वम् मन्दं मन्दं चलनाय

विदूषक—अन्तर्गृह में रहने से कर्पूरमञ्जरी के सारे शरीर पर पसीना आरहा है; वस्त्र के छोर से इसको हवा कर दूँ (हवा करते हुए) अरे ! अरे ! वस्त्र के छोर की हवा से दीपक बुझ गया। (विचार कर अपने मन में) चलो सैर करने बाग में चलें। (प्रकट में) बड़ा अन्धेरा है। सुरंग के दरवाजे से ही बाग की ओर चलें।

(सब निकलने का अभिनय करते हैं)

राजा—(कर्पूरमञ्जरी का हाथ पकड़ कर)—

टिप्पणी—गर्भगृहम् = घर के अन्दर का भाग। स्वेदस्य सलिलेन सिक्तं गात्रं यस्याः सा स्वेदसलिलसिक्तगात्रा = पसीने से भीगे शरीर वाली। सिचयाञ्चलेन = वस्त्र के छोर से। वीजयिष्यामि = हवा करूँगा। निर्वाणः = बुझ गया, निर् √ वा + त = निर्वाण—क्तप्रत्यय—को न आदेश (निर्वाणोऽवाते)। अन्धकारनृत्यम् = अत्यन्त अंधेरा। सुरङ्गामुखेन = सुरंग के रास्ते से।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

टिप्पणी—पाणिरेव पल्लवः = पाणिपल्लवः, हस्ते स्थितः पाणिपल्लवः यस्याः सा हस्त-

(स्पर्शसुखमभिनीय)

जे णवस्स तिउसस्स कण्टआ जे कदम्बमउलस्स केसरा ।
अज्ज तुज्झ करफंससंगिहि ते हुअंति मह अंगणिज्जिदा ॥ २४ ॥
[येन नवस्य त्रपुषस्य कण्टका ये कदम्बमुकुलस्य केसराः ।
अद्य तव करस्पर्शसङ्गिभिस्ते भवन्ति ममाङ्गनिर्जिताः ॥ २४ ॥]

(नेपथ्ये)

वैतालिकः—सुहणिबन्धणो भोदु देवस्स चन्दुज्जोदो । [सुखनिबन्धनो भवतु देवस्य चन्द्रोद्द्योतः]—

प्रयासं कुरु । तव मन्दगतिरेतादृशी भवेत् यत्तां दृष्ट्वा कलहंसानामपि मन्दगतिं जना नाद्रियेरन् ॥ २३ ॥

अन्वयः—ये नवस्य त्रपुषस्य कण्टकाः, ये कदम्बमुकुलस्य केसराः, ते अद्य तव करस्पर्शसङ्गिभिः मम अङ्गैर्निर्जिता भवन्ति ।

सरलार्थः—ये नवस्य त्रपुषाख्यफलविशेषस्य कण्टकाः, ये च कदम्बमुकुलस्य किञ्जल्काः भवन्ति, ते अद्य तव करस्पर्शं लब्ध्वा सञ्जातरोमाञ्चैः मम अङ्गैः निर्जिताः सन्ति, तव करस्पर्शेन मम अतीव रोमहर्षो जात इति भावः ॥ २४ ॥

मैंने अपने हाथ से तेरा कोमल हाथ पकड़ लिया है, तू धीरे-धीरे चलने के लिये प्रयत्न कर, ताकि हंसों की चाल भी तेरी चाल के समान अप्रिय हो जाय ॥ २३ ॥

(स्पर्शजनित सुख का अभिनय कर)

त्रपुष नाम के फल में जो काँटे होते हैं, अथवा कदम्ब के फूल में जो केसर होती हैं, वे सब तेरे हाथ का स्पर्श पाकर उत्पन्न हुए रोमाञ्च वाले मेरी अंगों के सामने कुछ भी नहीं हैं ॥ २४ ॥

(नेपथ्य में)

वैतालिक—महाराज़ के लिए चन्द्रोदय सुखकर हो ।

स्थितपाणिपल्लवा = करनिहितकरकिसलया । ईषत्संचरणाय बन्धुरा = ईषत्संचरणबन्धुरा । मन्दं मन्दं चलनाय उत्थापितगात्रा । केलिगमने = मस्त चाल । दुर्भगा = अप्रिय ॥ २३ ॥

१. त्रपुस = एक फल का नाम । २. केसर : = किञ्जल्क ।

३. सुखस्य निबन्धनः = सुखनिबन्धनः = सुखहेतुः । ४. चन्द्रोद्द्योतः = चन्द्रमा का प्रकाश ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भूंगोले तिमिराणुबन्धमलिणे भूमीरुहेव्व ट्ठिदे
संजादा णवभुज्जपिज्जरमुही जोण्हाअ पुव्वा दिसा।
मुञ्चन्तो मुचुकुन्दकेसरसिरीसोहाणुआरे करे,
चन्दो पेक्ख कलक्कमेण अ गदो सम्पुण्णबिम्बत्तणं ॥ २५ ॥

[भूगोले तिमिरानुबन्धमलिने भूमिरुह इव स्थिते
सञ्जाता नवभूर्जपिञ्जरमुखी ज्योत्स्नया पूर्वा दिशा।
मुञ्चन्मुचुकुन्दकेसरश्रीशोभानुकारान् करान्
चन्द्रः पश्य कलाक्रमेण च गतः सम्पूर्णबिम्बत्वम् ॥ २५ ॥]

अन्वयः—तिमिरानुबन्धमलिने भूगोले भूमिरुहे इव स्थिते पूर्वा दिशा ज्योत्स्नया नवभूर्जपिञ्जरमुखी सञ्जाता। मुचुकुन्दकेसरश्रीशोभानुकारान् करान् मुञ्चन् चन्द्रः कलाक्रमेण सम्पूर्णबिम्बत्वम् गतः, पश्य।

व्याख्या—तिमिराणामन्धकाराणामनुबन्धेन सततसञ्चारेण भूगोले भूमण्डले भूमिरुहे वृक्ष इव स्थिते नीलीभूते सति पूर्वा दिशा ज्योत्स्नया चन्द्रिकया नवभूर्जपत्रमिव पिङ्गलमुखी कपिशवर्णा सञ्जाता ! मुचुकुन्दाख्यस्य कुसुमस्य ये केसरा। किञ्जल्काः तेषां या श्रीः तत्सदृशीं शोभां धारयतः किरणान् मुञ्चन् अभिक्षिपन् चन्द्रः कलाक्रमेण सम्पूर्णमण्डलत्वं गतः प्राप्तः ! शनैः शनैः चन्द्रः पूर्णतामुपगतः। त्वं तम् पश्येति भावः ॥ २५ ॥

सरलार्थः—अन्धकारस्य बाहुल्येन भूमण्डलं नीलीभूतमासीत्, चन्द्रिकया प्राची दिशा सपदि एव भूर्जपत्रमिव उज्ज्वलाऽभवत्। चन्द्रः अमिता स्वकिरणान्

अन्धकार के लगातार बढ़ने से भूमण्डल के मलिन और वृक्ष की तरह नीले मालूम पड़ने पर पूर्व दिशा चांदनी से नये भोजपत्र के समान पीली हो गई है। मुचुकुन्द फूल की केसर की शोभा के समान शोभावाली किरणों को बरसाता हुआ चन्द्रमा, देखो किस तरह धीरे-धीरे अपनी कलाओं से पूर्ण हो गया है ॥ २५ ॥

टिप्पणी—तिमिरस्य अनुबन्धेन मलिने = तिमिरानुबन्धमलिने = अन्धकारस्य सततसंचारेणावृते। भूमिरुहः = वृक्ष। नवभूर्जस्य इव पिञ्जरं मुखम् यस्याः सा नवभूर्जपिञ्जरमुखी = नवभूर्जपत्रपिंगलवर्णा। मुचुकुन्दस्य केसराः मुचुकुन्दकेसराः तेषां या श्रीः तस्याः शोभाम् अनुकुर्वन्ति—तान्—मुचुकुन्दकेसरश्रीशोभानुकारान = मुचुकुन्दकिञ्जल्कसमृद्धिशोभायुक्तान्। मुचुकुन्द = एक प्रकार का फूल। मुञ्चन् = छोड़ता हुआ—√मुच्+अत—शत्रन्त। सम्पूर्णः बिम्बः यस्य सः सम्पूर्णबिम्बः, तस्य भावस्तत्त्वम् = सम्पूर्णबिम्बत्वम् = सम्पूर्णमण्डलत्वम्। कलाक्रमेण = कलाओं के क्रम से ॥ २५ ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अवि अ [अपि च]—

अकुंकुममचन्दणं दसदिसावहूमंडणं
अकंकणमकुण्डलं भुवणमण्डलीभूसणं।
असोसणममोहणं मअरलञ्छणस्साउहं
मिअङ्ककिरणावली णह अलम्मि पुञ्जिज्जइ ॥ २६ ॥

[अकुङ्कुममचन्दनं दशदिशावधूमण्डनं
अकङ्कणमकुण्डलं भुवनमण्डलीभूषणम्।
अशोषणममोहनं मकरलाञ्छनस्यायुधं
मृगाङ्ककिरणावली नभस्तले पुञ्जीभवति ॥ २६ ॥]

विदूषकः—भो ! कणअचण्डेण वण्णिदा चन्दुज्जोदलच्छी, ता सम्पदं माणिक्कचण्डस्सावसरो। [भोः ! कनकचण्डेन वर्णिता चन्द्रोद्योतलक्ष्मीः, तत् साम्प्रतं माणिक्यचण्डस्यावसरः।]

वर्षति, शनैः शनैः कलानां वृद्धया पूर्णश्च सञ्जात इति त्वं चन्द्रं पश्येति भावः ॥ २५ ॥

अन्वयः—अकुङ्कुमम् अचन्दनम् दशदिशावधूमण्डनम् अकङ्कणम् अकुण्डलम् भुवनमण्डलीभूषणम् अशोषणम् अमोहनम् मकरलाञ्छनस्य आयुधम् मृगाङ्ककिरणावली नभस्तले पुञ्जीभवति।

सरलार्थः—कुङ्कुमरहितम्, चन्दनविहीनम्, दशानां दिगङ्गनानाम् आभू-

---

और भी—

कुङ्कुम से रहित, चन्दनविहीन, दशों दिशाओं को सजाने वाली, कङ्कणरहित, विना कुण्डल की, संसार की शोभा, लोगों को तृप्त करने वाली तथा मोह न करने वाली और कामदेव की अद्भुत ये चन्द्ररश्मियाँ आकाश में इकट्ठी हो रही हैं।

विदूषक—कनकचण्ड ने चांदनी का वर्णन कर दिया, अब माणिक्यचण्ड की बारी है।

टिप्पणी—नास्ति कुङ्कुमं गन्धद्रव्यविशेषः यस्मिन् तत्=अकुङ्कुमम्=कुङ्कुमरहितम्। दशानां दिशावधूनां मण्डनम् = दशदिशावधूमण्डनम्=दशदिगङ्गनाभूषणम्। भुवनमण्डल्याः भूषणम् = भुवनमण्डलीभूषणम् = जगतीतलालङ्करणम्। मकरः अस्ति लाञ्छनं यस्य स तस्य मकरलाञ्छनस्य = कामदेवस्य। मृगाङ्कस्य किरणानाम् आवली ॥ मृगाङ्ककिरणावली = चन्द्ररश्मिनिचयः। पुञ्जीभवति = सञ्चीयते (च्विप्रत्ययान्त) ॥ २६ ॥

टिप्पणी—कनकचण्डः = प्रथम वैतालिक का नाम। चन्द्रोद्योतलक्ष्मीः = चन्द्रमा के प्रकाश की शोभा। माणिक्यचण्डः = द्वितीय वैतालिक का नाम।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(नेपथ्ये)

द्वितीयो वैतालिकः—

उज्झन्तागुरुधूववट्टिकलिआ दीज्जन्तदीवुज्जला
लम्बिज्जन्तविचित्तमोत्तिअलआ मुञ्चन्तपारावआ।
सज्जिज्जन्तमणोज्जकेलिसअणा जम्पन्तदूईसआ
सज्जुच्छङ्गवलन्तमाणिणिजणा वट्टन्ति लीलाघरा ॥ २७ ॥

[दह्यमानागुरुधूपवर्त्तिकलिका दीप्यमानदीपोज्ज्वला
लम्ब्यमानविचित्रमौक्तिकलता मुच्यमानपारावताः ।
सज्जीक्रियमाणमनोज्ञकेलिशयना जल्पद्दूतीशताः
शय्योत्सङ्गवलन्मानिनीजना वर्तन्ते लीलागृहाः ॥ २७ ॥]

पणम्, कङ्कणरहितम्, कुण्डलवर्जितम्, संसारस्य अलङ्करणम्, अशोषणम्, मोहस्य अञ्जनकम्, कामदेवस्यास्त्रभूतम् च इयं चन्द्ररश्मिमाला आकाशे राशीभवति॥२६॥

अन्वयः—लीलागृहाः दह्यमानागुरुधूपवर्तिकलिकाः दीप्यमानदीपोज्ज्वलाः लम्ब्यमानविचित्रमौक्तिकलताः मुच्यमानपारावताः सज्जीक्रियमाणमनोज्ञकेलिशयनाः जल्पद्दूतीशताः शय्योत्सङ्गवलन्मानिनीजनाः वर्तन्ते ॥ २७ ॥

सरलार्थः—क्रीडामन्दिरेषु अगुरुधूपानां वर्तयः कलिकारूपेण सौगन्ध्यसञ्चारार्थम् दह्यमानाः सन्ति, क्रीडामन्दिराणि प्रज्वाल्यमानैः दीपैः प्रकाशितानि सन्ति,

---

(नेपथ्य में)

द्वितीय वैतालिक—लीलागृहों में अगरधूप की वत्तियाँ कलियों की तरह जल रही हैं, दीप्यमान दीपकों से लीलागृहों में प्रकाश हो रहा है, सुन्दर मौक्तिक लताएँ सजावट के लिए लटकी हुई हैं, अपने स्थानों से कबूतर छोड़ दिये गये हैं, सुन्दर शय्यायें सजा दी गई हैं, सैकड़ों दूतियाँ इधर-उधर बात कर रही हैं, मानिनी स्त्रियाँ शय्याओं के पास बैठी हुई हैं ॥२७॥

टिप्पणी—अगुरुधूपानाम् वर्तयः = अगुरुधूपवर्तयः । दह्यमानाः अगुरुधूपवर्तयः एव कलिकाः येषु ते दह्यमानागुरुधूपवर्तिकलिकाः = जलती हुई अगुरुधूप की बत्तियाँ ही हैं कलियाँ जिनमें । दीप्यमानैः दीपैः उज्ज्वलाः = दीप्यमानदीपोज्ज्वलाः = प्रज्वाल्यमानदीपप्रकाशिताः । लम्ब्यमानाः विचित्राः मौक्तिकलताः येषु ते लम्ब्यमानविचित्रमौक्तिकलताः = आन्दोल्यमानरमणीयमुक्ताप्रलम्बाः । सजावट के लिये लटकायी गयीं हैं मोतियों की लड़ें जिनमें । मुच्यमानाः पारावताः येषु ते मुच्यमानपारावताः = अपने आवास से छोड़ दिये गये हैं कबूतर जहाँ पर (सुरत-क्रीड़ाओं के उद्दीपक होने के कारण) । सज्जीक्रियमाणानि मनोज्ञानि केलिशयनानि येषु ते सज्जीक्रियमाणमनोज्ञकेलिशयनाः = मनोहरपर्यंक-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अवि अ [अपि च]—

देन्ता कप्पूरपूरच्छुरणमिव दिसासुन्दरीणं मुहेसु
लण्हं जोण्हं किरन्तो भुअणजणमणोणंदणं चंदणं व्व ।
जिण्णं कन्दप्पकन्दं तिहुअणकलणाकन्दलिल्लं कुणन्ता
जादा एणङ्कपादा सअलजलहरोम्मुक्कधाराणुआरा ॥ २८ ।

[ददतः कर्पूरपूरच्छुरणमिव दिशासुन्दरीणां मुखेषु
श्लक्ष्णां ज्योत्स्नां किरन्तो भुवनजनमनोनन्दनं चन्दनमिव ।
जीर्णं कन्दर्पकन्दं त्रिभुवनकलनाकन्दलितं कुर्वन्तो
जाता एणाङ्कपादाः सजलजलधरोन्मुक्तधारानुकाराः ॥ २८ ॥]

तेषु रम्याः मौक्तिकलताः शोभार्थम् लम्ब्यमानाः दृश्यन्ते, पारावताश्च स्वावासात मुच्यमानाः सन्ति, क्रीडामन्दिरेषु मनोहराणि पर्यङ्कानि पुष्परचनादिभिः सज्जीकृतानि सन्ति, दूतीनां समूहाश्च इतस्ततः जल्पन्तः वर्तन्ते, मानिनीजनश्च लीलागृहेषु शय्याया अन्तिके तिष्ठन्नास्ते ॥ २७ ॥

अन्वयः—राजलजलधरोन्मुक्तधारानुकाराः एणाङ्कपादाः दिशासुन्दरीणाम् मुखेषु कर्पूरपूरच्छुरणमिव ददतः, भुवनजनमनोनन्दनं चन्दनमिव श्लक्ष्णां ज्योत्स्नाम् किरन्तः, जीर्णम् कन्दर्पकन्दम् त्रिभुवनकलनाकन्दलितम् कुर्वन्तः जाताः ।

व्याख्या—जलेन सहिताः सजलाः, सजलजलधरैः मेघैः उन्मुक्तानां धाराणां सदृशाः चन्द्रकिरणाः दिगङ्गनानाम् मुखेषु कर्पूरचूर्णस्य लेपनं कुर्वन्त इव दृश्यन्ते

और भी—

जल से भरे हुये मेघों से उन्मुक्त धाराओं जैसी चन्द्रमा की किरणें दिशारूपी सुन्दरियों के मुख पर कपूर के चूर्ण का लेप-सा देती हुई दिखाई देती हैं, (अर्थात सारी दिशायें कपूर की तरह उज्ज्वल हो रही हैं)। सारे संसार के मन को प्रसन्न करने वाले चन्दन की तरह

युक्ताः । जल्पन्ति दूतीनां शतानि येषु ते जल्पद्दूतीशताः = सैकड़ों दूतियाँ जहाँ पर बातचीत कर रही हैं । शय्यायाः उत्सङ्गे वलन् मानिनी जनः येषु ते शय्योत्सङ्गवलन्मानिनीजनाः = पर्यंकप्रान्ततिष्ठन्मानिनीजनाः । शय्या के पास बैठी हैं मानिनी स्त्रियाँ जहाँ पर। लीलागृहाः = क्रीडामन्दिराणि । विश्राम करने के कमरे । ऊपर आये हुये सब पद 'लीलागृहाः' के विशेषण हैं ॥ २७ ॥

टिप्पणी—जलेन सहिताः सजलाः, सजलाश्च ये जलधराः, सजलजलधराः, तैः उन्मुक्ताः याः धाराः ताः अनुकुर्वन्ति, ते सजलजलधरोन्मुक्तधारानुकाराः—सजलमेघाभिवृष्टधारासदृशाः—जल से भरे हुये मेघों से उन्मुक्त धारा की तरह । एणाङ्कस्य मृगाङ्कस्य पादाः =

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विदूषकः—

दिसवहुत्तंसो णहसरहंसो । णिहुवणकन्दो पसरइ चन्दो ॥ २९ ॥

[दिग्वधूत्तंसो नभःसरोहंसः । निधुवनकन्दः प्रसरति चन्द्रः ॥ २९ ॥]

कुरङ्गिका—

ससहररइदमरट्टो माणिणिमाणघरट्टो ।
णवचम्पअकोदंडो मअणो जअइ पअण्डो ॥ ३० ॥
[शशधररचितगर्वो मानिनीमानघरट्टः ।
नवचम्पककोदण्डो मदनो जयति प्रचण्डः ॥ ३० ॥]

सर्वाः दिशः साम्प्रतम् धवलाः सञ्जाताः । चन्द्रकिरणाः सर्वस्य लोकस्य मनसः आह्लादकम् चन्दनमिव चिक्कणां चन्द्रिकां किरन्ति (वर्षन्ति) । जीर्णम् तिरस्कृतं नातिप्रवृद्धम् कामं त्रिभुवनस्य व्यापनेन कन्दलितं कुर्वन्तः वर्धयन्तः चन्द्ररश्मयः दृश्यन्ते ॥ २८ ॥

सरलार्थः—दिगङ्गनानाम् आभूषणम्, नभःसरसि हंस इव दृश्यमानः सुरतस्य उद्दीपकः चन्द्र उदयते ॥ २९ ॥

सरलार्थः—चन्द्रेण यस्य गर्वं उत्पादितोऽस्ति, यश्च मानिनीनां मानं मर्दयति, नवचम्पकपुष्पमेव च यस्य धनुरस्ति स उद्धतः मदनः जयति सर्वोत्कर्षेण विराजते ।

स्वच्छ और चिक्कण चांदनी फैला रही हैं, शान्त कामदेव को तीनों लोकों में फैलाकर ये चन्द्रकिरणें काम का उद्दीपन कर रही हैं ॥ २८ ॥

विदूषक—दिशारूपी स्त्रियों का आभूषण, आकाशरूपी सरोवर में हंस की तरह विहार करने वाला तथा शृङ्गार रस का उद्दीपक यह चन्द्रमा उदय हो रहा है ।

कुरङ्गिका—चन्द्रमा ने जिसको गर्वीला बना दिया है, जो मानिनी स्त्रियों के मान को

पणाङ्कपादाः = चन्द्ररश्मयः । कर्पूरस्य पूरैः छुरणम् = कर्पूरचूर्णलेपनम् । ददतः=देती हुई-√दा+अत शत्रन्त । श्लक्ष्ण = चिकना । किरन्तः = वर्षन्तः√कृ+अ+अत्-शत्रन्त । त्रिभुवनस्य कलनया कन्दलितम् = त्रिभुवनकलनाकन्दलितम्-त्रिभुवनव्यापनेन प्रवृद्धम् । जीर्णम् = तिरस्कृतम्, नष्टप्रभावम् ॥ २८ ॥

टिप्पणी—दिगेव वधूः = दिग्वधूः, तस्याः उत्तंसः = दिग्वधूत्तंसः= दिगङ्गनाकर्णभूषणम् नभ एव सरः, तस्य हंसः = नभःसरोहंसः = आकाशसरसीहंसः-आकाशरूपी सरोवर में हंस के समान । निधुवनस्य कन्दः = निधुवनकन्दः = सम्भोगोद्दीपकः । प्रसरति उदयति, उदय होता है ॥ २९ ॥

टिप्पणी—शशधरेण रचितः गर्वः यस्य सः शशधररचितगर्वः = शशधरोत्पादिताभि-

CC-0. Nepal Sanskrit Academy, Kathmandu. Collection.

(कर्पूरमञ्जरीं प्रति)—पिअसहि ! तुए किदं चन्दवण्णणं महाराअस्स पुरदो पढिस्सं । [**प्रियसखि ! त्वया कृतं चन्द्रवर्णनं महाराजस्य पुरतः पठिष्यामि ।**]

(कर्पूरमञ्जरी लज्जते । कुरङ्गिका पठति)

मण्डले ससहरस्स गोरए दन्तपञ्जरविलासचोरए ।
भाई लंछणमओ फुरन्तओ केलिकोइलतुलं धरन्तओ ॥ ३१ ॥
[**मण्डले शशधरस्य गौरे दन्तपञ्जरविलासचौरे ।**
भाति लाञ्छनमृगः स्फुरन् केलिकोकिलतुलां धारयन् ॥ ३१ ॥]

राजा—अहो ! कप्पूरमञ्जरीए अहिणवत्थदंसणं रमणीओ सद्दो, उत्तिविचित्त, रसणिस्संदो अ । [**अहो ! कर्पूरमञ्जर्या अभिनवार्थदर्शनं, रमणीयः शब्दः, उक्तिविचित्रता, रसनिष्यन्दश्च ।**] (तां प्रति)

अन्वयः—गौरे दन्तपञ्जरविलासचौरे शशधरस्य मण्डले स्फुरन् लाञ्छनमृगः कलिकोकिलतुलां धारयन् भाति ।

सरलार्थः—गौरवर्णे हस्तिदन्तनिर्मितात्पञ्जरादपि उत्कृष्टे चन्द्रमसः मण्डले स्फुरन् अयं कलङ्करूपो मृगः क्रीडापिक इव शोभते ॥ ३१ ॥

चूर करने वाला है तथा चम्पा का नया फूल ही जिसका धनुष है ऐसा कामदेव बड़ी प्रचण्डता से संसार को जीत रहा है ॥ ३० ॥

(कर्पूरमञ्जरी से) प्रियसखि ! तुम्हारे द्वारा किया हुआ चन्द्रवर्णन महाराज के सामने पढ़ूँगा ।

(कर्पूरमञ्जरी शर्माती है । कुरङ्गिका पढ़ती है ।)

उज्ज्वल तथा हाथीदांत के बने पिंजड़े से भी अधिक सुन्दर चन्द्रमा के मण्डल में घूमता हुआ यह कलङ्क मृग खिलौने के कोयल की तरह शोभायमान है ॥ ३१ ॥

राजा—आश्चर्य है, कर्पूरमञ्जरी ने नई बात कही है, शब्द भी सुन्दर हैं, उक्ति विचित्र है, रस भी खूब झलकता है । **(कर्पूरमञ्जरी से)**—

मानः । मानिनीनां मानस्य घरट्टः = मानिनीमानघरट्टः = मानवती स्त्रियों के मान को नष्ट करने वाला । घरट्टः = चक्की, पीसने का यन्त्रविशेष । नवचम्पकमेव कोदण्डः यस्य सः नवचम्पककोदण्डः = नवचम्पकधनुः ॥ ३१ ॥

टिप्पणी—दन्तपञ्जरस्य विलासं चोरयतीति तस्मिन् दन्तपञ्जरविलासचौरे = हाथीदाँत के बने पिंजड़े से भी अधिक सुन्दर । धारयन् = धारण करता हुआ—√धारि+अ+अत्–शत्रन्त ॥ ३१ ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मा कहं पि वअणेण विब्भमो होउ इत्ति तुह णूणमिन्दुणा।
लत्तणंछणच्छलमसीविसेसओ पेच्छ विम्बफलये णिए कओ॥ ३२॥
[मा कथमपि वदनेन विभ्रमो भवत्विति तव नूनमिन्दुना।
लाञ्छनच्छलमसीविशेषकः पश्य बिम्बफलके निजे कृतः॥ ३२॥]
किं अ [किञ्च]—
पण्डुरेण जइ रज्जए मुहं कोमलांगि! खडिआरसेण दे।
दिज्जए पण कवोलकज्जलं ता ल्हेदि ससिणो विडम्बणं॥ ३३॥
[पाण्डुरेण यदि रज्यते मुखं कोमलाङ्गि! खटिकारसेन ते।
दीयते पुनः कपोलकज्जलं तदा लभते शशिनो विडम्बनम्॥ ३३॥]

अन्वयः—नूनम्, तव वदनेन कथमपि विभ्रमः मा भवतु इति इन्दुना निजे विम्बफलके लाञ्छनच्छलमसीविशेषकः कृतः, पश्य।

सरलार्थः—तव मुखं दृष्ट्वा चन्द्रोऽयमिति भ्रान्तिः लोकस्य मा भवतु इति हेतोः चन्द्रेण स्वबिम्बे कलङ्कव्याजेन मसीविशेषकः कृतोऽस्ति इति मन्ये। तव मुखं निष्कलङ्कम्, चन्द्रस्तु सकलङ्क इति व्यतिरेकोऽत्र॥ ३२॥

अन्वयः—हे कोमलाङ्गि! यदि पाण्डुरेण खटिकारसेन ते मुखम् रज्यते, पुनः कपोलकज्जलम् दीयते तदा शशिनो विडम्बनम् लभते।

सरलार्थः—अपि सुकुमारशरीरे यदि धवलेन खटिकाद्रवेण ते मुखं रज्येत लिप्येत वा, पुनः कपोलयोः कज्जलं दीयेत तदा ते मुखं चन्द्रमसः अनुकरणम् प्राप्नोत्। तव मुखं शशिना सममिति भावः॥ ३३॥

तेरे मुख को देख कर लोग चन्द्रमा न समझ बैठे इसलिए निश्चय ही चन्द्रमा ने अपने मण्डल में कलङ्क के बहाने यह धब्बा लगा दिया है, तू देख!॥ ३२॥

और भी—

अयि कोमल शरीरवाली! यदि सफेद खड़िया का रस तुम्हारे मुँह पर लगाया जाय और गालों पर काला चिह्न बना दिया जाय, तो तुम्हारा मुख चन्द्रमा की समता करने लगेगा॥ ३३॥

टिप्पणी—नूनम् = निश्चय करके। लान्छनस्य छलेन मसीविशेषकः = लान्छनच्छलमसीविशेषकः॥ ३२॥

टिप्पणी—पाण्डुर = धवल। खटिका = खड़िया। विडम्बनम् = अनुकरणम्। √रञ्ज् रागे-रज्यते-कर्मवाच्य लट्, प्रथम पुरुष एकवचन॥ ३३॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(चन्द्रमुद्दिश्य)

मुक्कसंक ! हरिणंक ! किं तुमं सुन्दरीपरिसरेण हिण्डसि ? ।
गोरगण्डपरिपण्डुरत्तणं पेच्छ दिण्णममुणा मुहे ण दे ? ॥ ३४ ॥
[मुक्तशङ्क ! हरिणाङ्क ! किं त्वं सुन्दरीपरिसरेण हिण्डसे ? ।
गौरगण्डपरिपाण्डुरत्वं पश्य दत्तममुना मुखे न ते ? ॥ ३४ ॥]

(नेपथ्ये महान् कलकलः । सर्वे आकर्णयन्ति)

राजा—किं उण एस कोलाहलो ? [किं पुनरेष कोलाहलः ?]

कर्पूरमञ्जरी—(ससाध्वसम्) पिअसहि ? एदंअवगमिअ आअच्छ । [प्रियसखि ! एतदवगम्य आगच्छ ।]

(कुरङ्गिका निष्क्रम्य प्रविशति)

विदूषकः—देवीए पिअवअस्सस्स वञ्चणा[1] किदेत्ति तिक्केमि । [देव्या प्रियवयस्यस्य वञ्चना कृतेति तर्कयामि[2] ।]

सरलार्थः—हे निर्लज्ज ! चन्द्र ! येन सुन्दरीमुखेन ते गौरयोः कपोलयोः परिपाण्डुरत्वं दत्तम्, तादृशसुन्दरीपरिसरे त्वं कुतो न परिभ्रमसि । अतः त्वं निर्लज्ज इति प्रतीयते । एतादृशं वस्तु त्वया यतः प्राप्तं तत्र ते भक्तिर्नास्ति ॥ ३४ ॥

(चन्द्रमा को देख कर)

हे निर्लज्ज चन्द्रमा ! जिस सुन्दरी के मुख ने तेरे गोरे-गोरे गालों पर सफेदी दी है उस सुन्दरी के पास तू क्यों नहीं घूमता ?—तू बड़ा निर्लज्ज हैं ॥ ३३ ॥

(नेपथ्य में बड़ा शोर होता है । सब सुनते हैं ।)

राजा—यह कोलाहल क्यों हो रहा है ?

कर्पूरमञ्जरी—(घबड़ाहट के साथ) प्रियसखि ! यह जान कर आओ ।

(कुरङ्गिका बाहर जाकर लौट आती है)

विदूषक—महारानी ने प्रियमित्र को धोखा दिया—ऐसा समझता हूँ ।

टिप्पणी—मुक्ता शङ्का येन सः, तत्सम्बुद्धौ हे मुक्तशङ्क = निःशङ्क । हिंडसे=घूमता है । गौरयोः गण्डयोः परिपाण्डुरत्वम् = गौरगण्डपरिपाण्डुरत्वम्=गौरकपोलधवलत्वम् ॥ ३४ ॥

टिप्पणी—साध्वसेन सह = ससाध्वसम् = घबराहट के साथ । अवगम्य = जानकर-अव√गम्+य-ल्यबन्त ।

१. वञ्चना = धोखा ।

२. तर्कयामि = सोचता हूँ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कुरङ्गिका—पिअसहि ! भट्टारअस्स वञ्चणं कदुअ तुए सह संगमं जाणिअ आअच्छदि देवी; तेण कुज्ज-वामण-किरात-वरिस वर सोविदल्लाणं एस हलबोलो। [प्रियसखि ! भट्टारकस्य वञ्चनां कृत्वा त्वया सह सङ्गमं ज्ञात्वा आगच्छति देवी, तेन कुब्ज-वामन-किरात-वर्षवर-सौविदल्लानामेष कोलाहलः।]

कर्पूरमञ्जरी—(सभयम्) ता मं पेसेदु महाराओ, जेणाहं इमिणा सुरंगामुहेण ज्जेव पविसिअ रक्खाघरअं गच्छेमि, जह देवी महारायण सह संगमं ण जाणादि। [तत् मां प्रेषयतु महाराजः; येनाहमनेन सुरुङ्गा-मुखेनैव प्रविश्य रक्षागृहकं गच्छामि, यथा देवी महाराजेन सह सङ्गमं न जानाति।]

(इति निष्क्रान्ताः सर्वे)

इति तृतीयजवनिकान्तरम्

कुरङ्गिका—प्रियसखि ! धोखा देकर तुझ से महाराज के मिलने का समाचार पाकर महारानी आ रही हैं, इसलिए कुब्ज-वामन-किरात-वर्षवर और सौविदल्लों का यह कोलाहल है।

कर्पूरमञ्जरी—(डर के साथ) महाराज मुझे आज्ञा दें, ताकि मैं इस सुरङ्ग से ही निकल कर रक्षागृह में चली जाऊँ और महारानी को भी आप से मिलने का वृत्तान्त ज्ञात न हो।

(सब का प्रस्थान)

टिप्पणी—वर्षवरः = अन्तःपुर का नौकर। सौविदल्ल = कञ्चुकी = अन्तःपुर का सेवक। प्रविश्य = घुसकर—प्र√विश्+य = ल्यबन्त।

तीसरी जवनिका समाप्त।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

चतुर्थं जवनिकान्तरम्

(ततः प्रविशति राजा विदूषकश्च)

राजा—अहो ! गाढअरो गिम्हो, पवणो अ प्पचण्डो, ता कधं णु सहिव्वो; जदो—[अहो गाढतरो ग्रीष्मः, पवनश्च प्रचण्डः तत कथं नु सोढव्यः, यतः]—

इह कुसुमसरेक्कगोअराणं इदमुभअं पि हुदूसहं त्ति मण्णे ।
जरढरइकरालिओ अ कालो तह अ जणेण पिएण विप्पलम्भो ॥ १ ॥
[इह कुसुमशरैकगोचराणामिदमुभयमपि सुदुःसहमिति मन्ये ।
जरठरविकरालितश्च कालस्तथा च जनेन प्रियेण विप्रलम्भः ॥ १ ॥]

विदूषकः—

एक्के दाव मम्महबाहणिज्जा अण्णे दाव सोसणिज्जा ।
अम्हारिसो उण जणो ण कामस्स बाहणिज्जो ण तावस्स सोसणिज्जो ॥

अन्वयः—इह कुसुमशरैकगोचराणाम् जरठरविकरालितः कालः तथा प्रियेण जनेन विप्रलम्भः च इदमुभयमपि सुदुःसहम् इति मन्ये ।

व्याख्या—इह संसारे कुसुमशरस्य कामदेवस्य एकगोचराणाम् एकमात्रविषयाणाम् काममोहितानाम् जरठेन प्रचण्डेन रविणा सूर्येण करालितः कालः ग्रीष्मर्तुः, तथा प्रियेण जनेन विप्रलम्भः विरहश्च इदमुभयमपि सुदुःसहम् दुःखेन सोढुमशक्यमिति सम्भावयामि ॥ १ ॥

(राजा और विदूषक रंगमंच पर आते हैं)

राजा—अरे ! बड़ी गर्मी है, हवा भी गर्म है, कैसे रहा जाय; क्योंकि—

इस संसार में कामार्तों के लिए ग्रीष्मऋतु तथा प्रियजन से वियोग ये दोनों बड़े ही कष्ट देने वाले हैं—ऐसा मैं समझता हूँ ॥ १ ॥

टिप्पणी—अयमनयोः अतिशयेन गाढः = गाढतरः—गाढ शब्द से तर प्रत्यय । सोढुं योग्यः = सोढव्यः—सह् धातु से तव्य प्रत्यय ।

टिप्पणी—कुसुमानि एव सन्ति शराः यस्य स कुसुमशरः तस्य एकगोचराणाम् = कुसुमशरैकगोचराणाम् = कामपीडितानाम् = कामदेव से सताये हुए । जरठेन रविणा करालितः = जरठरविकरालितः = प्रचण्डसूर्यतप्तः । विप्रलम्भः = वियोगः ॥ १ ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

[एके तावत् मदनबाधनीया[1] अन्ये तापशोषणीयाः ।
अस्मादृशः पुनर्जनो कामस्य बाधनीयो न तापस्य शोषणीयः ॥ २ ॥]

(नेपथ्ये)

ता किं ण क्खु दे मूलुप्पाडिआविअलं सीसं करिस्सं ? ।
[तत् किं न खलु ते मूलोत्पाटितचूलिकाविकलं शीर्षं करिष्यामि ? ।]

राजा--(विहस्य) वअस्स ! लीलावणसच्छन्दचारिणा केलिसुएण किं भणिदं ? [वयस्य ! [2]लीलावनस्वच्छन्दचारिणा केलिशुकेन किं भणितम् ?]

विदूषकः—(सक्रोधम्) आ दासीए उत्त ! सूलाअरणजोग्गोसि । [आः दास्याः पुत्र ! शूलाकरणयोग्योऽसि[3] ।]

(नेपथ्ये)

सुव्वं तुम्हारिसाहिंतो सम्भाविज्जदि, जइ मे ण होन्ति पक्खावलीओ । [सर्वं युष्मादृशेभ्यः सम्भाव्यते, यदि मे न भवन्ति पक्षावल्यः[4] ।]

सरलार्थः—केचन जनाः कामस्य पीडनीयाः भवन्ति, अन्ये जनाः निदाघ-तापेन शोषणीयाः भवन्ति । अस्मादृशः जनः न कामस्य बाधनीयः, न वा तापस्य शोषणीय इत्यर्थः ॥ २ ॥

विदूषक—कुछ लोगों को तो काम सताता है कुछ लोग गर्मी से दुःख पाते हैं । हम जैसे को तो न काम ही सताता है न गर्मी ही दुःख देती है ॥ २ ॥

(नेपथ्य में)

जड़ सहित चोटी कर तेरे सिर को विरूप क्यों न कर दूँ ?

राजा—(हँसकर) मित्र ! लीलावन में स्वच्छन्द घूमने वाले तोते ने क्या कहा ?

विदूषक—(क्रोध के साथ) अरे दासी के पुत्र ! फाँसी देने के योग्य है ।

(नेपथ्य में)

तुम्हारे जैसे सब कुछ कर सकते हैं, अगर मेरे पंख न हों ।

---

१. बाधनीयाः = पीडनीयाः– √बाध् धातु से अनीय प्रत्यय ।

टिप्पणी--मूलात् उत्पाटिता = मूलोत्पाटिता । मूलोत्पाटिता चासौ चूलिका तया विकलम् = मूलोत्पाटितचूलिकाविकलम् = समूलोन्मूलितकेशनिचयविकलम्–जड़सहित बालों के उखाड़ने से विरूप । शीर्षम् = सिर ।

२. लीलावने स्वच्छन्दं चरति, तेन लीलावनस्वच्छन्दचारिणा = क्रीडाकाननस्वच्छन्द-विहारिणा—लीलावन में स्वच्छ विहार करनेवाला ।

३. शूलाकरणयोग्यः = मारे जाने के योग्य ।

४. पक्षावल्यः = पंखों की पंक्तियाँ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

राजा— (विलोक्य) कहं उड्डीणो ज्जेव्व । [कथमुड्डीन[1] एव ।]

(विदूषकं प्रति)

णिसा तलिणवित्थरा तह दिणेसु वड्ढत्तणं
ससी लहदि खण्डणं तह अ चण्डबिम्बो रई ।
णिदाहदिअसेसु विप्फुरदि जस्स एव्वं क्कमो
कहं ण स विही तदो सुरसिहाइं खण्डिज्जदि ॥ ३ ॥

[निशाऽस्तलीनविस्तरा तथा दिनेषु वृद्धत्वं
शशी लभते खण्डनं तथा च चण्डबिम्बो रविः ।
निदाघदिवसेषु विस्फुरति यस्यैष क्रमः
कथं न स विधिस्ततः क्षुरशिखाभिः खण्डयते ? ॥ ३ ॥]

किं अ, णिउणं सेवणिज्जो जइ सुहसंगमो भोदि । जदो–[किञ्च, निपुणं सेवनीयो यदि शुभसङ्गमो भवति । यतः]—

अन्वयः—निशा अस्तलीनविस्तरा, तथा दिनेषु वृद्धत्वम्, शशी खण्डनं लभते, तथा रविः च चण्डबिम्बः, निदाघदिवसेषु यस्य एष क्रमः विस्फुरति, सः विधिः ततः क्षुरशिखाभिः कथं न खण्डयते ।

सरलार्थः—रात्रिः अल्पकालीना सञ्जाता, दिनानि तु दीर्घाणि भवन्ति, चन्द्रमाः ह्रासं लभते, स्वल्पकालमेव च गगने तिष्ठति सूर्यश्च दीर्घकालं तपति ।

राजा—(देखकर) क्या उड़ ही गया ।

(विदूषक से)

रात्रि छोटी होती है, दिन बड़े होते हैं, चन्द्रमा घटता जाता है, सूर्य अत्यन्त प्रचण्ड होता जाता है । गर्मी के दिनों में जिस विधि का ऐसा नियम रहता है उसे क्यों न छुरी से काट दिया जाय ॥ ३ ॥

अगर अपना प्रिय पास में हो, तो इस समय का सदुपयोग करना चाहिए । क्योंकि–

---

१. उड्डीनः = उड़ गया । उत् पूर्वक √डी धातु से क्त प्रत्यय त को न आदेश ।

टिप्पणी—अस्तं लीनः = अस्तलीनः, अस्तलीनः विस्तरः यस्याः सा अस्तलीनविस्तरा = लघुः । खण्डनम् = ह्रासम् । चण्डः बिम्बो यस्य स चण्डबिम्बः तीव्रसन्तापः । निदाघदिवसेषु = ग्रीष्मदिनेषु । क्षुरस्य शिखाभिः = क्षुरशिखाभिः = क्षुरधाराभिः । खण्डयते = छिद्यते, काटा जाता है ॥ ३ ॥

टिप्पणी—निपुणम् = अच्छी तरह । सेवितुं योग्यः = सेवनीयः– √सेव् + अनीय = सेवनीय = उपभोग करने के योग्य ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मज्झण्णे सिरिखण्डपंककलणा आ संझमोल्लंसुअं
लीलामज्जणमापदोससमअं साअं सुरा सीअला।
गिम्हे पच्छिमजामिणीणिहुवणं जं किं पि पञ्चेसुणो
एदे पञ्च सिलीमुहा विजइणो सेसा सरा जज्जरा ॥ ४ ॥

[मध्याह्ने श्रीखण्डपङ्ककलना आसन्ध्यमार्द्रांशुकं
लीलामज्जनमा-प्रदोषसमयं सायं सुरा शीतला।
ग्रीष्मे पश्चिमयामिनीनिधुवनं यत् किमपि पञ्चेषोः
एते पञ्च शिलीमुखा विजयिनः शेषाः शरा जर्जराः ॥ ४ ॥]

यस्य विधेः ग्रीष्मदिनेषु एतादृशः नियमः प्रसरति स क्षुरधाराभिः कथं न छिद्यते। अवश्यमेव स छेत्तव्य इति भावः ॥ ३ ॥

अन्वयः—ग्रीष्मे मध्याह्ने श्रीखण्डपङ्ककलना, आसन्ध्यम् आर्द्रांशुकम्, आप्रदोषसमयम् लीलामज्जनम्, सायं शीतला सुरा, यत् किमपि पश्चिमयामिनीनिधुवनम् पञ्चेषोः एते पञ्च शिलीमुखाः विजयिनः शेषाः शराः जर्जराः।

व्याख्या—ग्रीष्मे निदाघे मध्याह्नकाले श्रीखण्डपङ्कस्य चन्दनरसस्य कलना चर्चा कर्तव्या। अङ्गेषु चन्दनलेपो विधेयः। आसन्ध्यम् सन्ध्याकालपर्यन्तम् आर्द्रांशुकम् जलसिक्तवसनम् परिधानीयम्। आप्रदोषसमयम् प्रदोषसमयपर्यन्तम् लीलामज्जनम् जलक्रीडा कर्तव्या। सायङ्काले च शीतला सुरा पेया। यत् किमप्यनिर्वचनीयम् अलौकिकानन्ददायकम् निधुवनम् सुरतं पश्चिमयामिन्यां रात्रिशेषे उपभोक्तव्यम्। पञ्चेषोः कामदेवस्य एते पञ्च बाणाः विजयिनः परमोत्कर्षशालिनः। सन्ति अन्ये शरास्तु जर्जराः जीर्णाः निष्फलाः, न तेषां कोऽपि प्रभाव इत्यर्थः ॥४॥

ग्रीष्मऋतु में दोपहर को चन्दन का लेप करना चाहिए। शाम तक गीले वस्त्र पहिनने चाहिए। रात्रि के प्रारम्भ होने पर खूब जलक्रीडा करनी चाहिए। फिर शीतल मदिरा पीनी चाहिए। रात्रि के पश्चिम भाग में सुरत का आनन्द लेना चाहिए। कामदेव के ये पाँच बाण बड़े तेज हैं और तो सब पुराने हो गये ॥ ४ ॥

टिप्पणी—श्रीखण्डस्य पङ्कः = श्रीखण्डपङ्कः, तस्य कलना = श्रीखण्डपङ्ककलना = चन्दनरसलेपः। सन्ध्यायाः आ = आसन्ध्यम् (अव्ययीभाव) = सन्ध्यापर्यन्तम्। प्रदोषसमयात् आ = आप्रदोषसमयम् (अव्ययीभाव) लीलामज्जनम् = जलक्रीडा। पश्चिमयामिन्यां निधुवनम् = पश्चिमयामिनीनिधुवनम् = रात्रिशेषे सुरतम्। पञ्च इषवः सन्ति यस्य तस्य पञ्चेषोः = कामदेवस्य। विजयिनः = उत्कृष्टाः। जर्जराः = क्षीणाः—पुराणाः ॥ ४ ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विदूषकः--मा एव्वं भण। [मा एवं भण]—
पण्डुच्छविच्छुरिदणाअलदादलाणं साहारतेल्लपरिपेसलपोप्फलाणं।
कप्पूरपंसुपरिवासिदचन्दणाणं भद्दं णिदाहदिअसाणं वअस्स ! भोदु ॥ ५॥
[पाण्डुच्छविच्छुरितनागलतादलानां सहकारतैलपरिपेशलपूगफलानाम्।
कर्पूरपांशुपरिवासितचन्दनानां भद्रं निदाघदिवसानां वयस्य! भवतु ॥ ५॥]

राजा--एदं उण एत्थ रमणिज्जं। [इदं पुनरत्र रमणीयम्]

सपञ्चमतरंगिणो सवणसीअला वेणुणो
समं सिसिरवारिणा वअणसीअला वारुणी।
सचन्दणघणत्थणी सअणसीअला कामिणी
णिदाहदिअहोसहं सहजसीअलं कस्स वि ॥ ६॥

अन्वयः—वयस्य ! पाण्डुच्छविच्छुरितनागलतादलानाम् सहकारतैलपरिपेशलपूगफलानाम् कर्पूरपांशुपरिवासितचन्दनानाम् निदाघदिवसानाम् भद्रम् भवतु।

व्याख्या—मित्र ! एते निदाघदिवसाः चिरं तिष्ठन्तु येषु नागलतानां दलाः पाण्डुभिः छविभिः छुरिताः व्याप्ताः दृश्यन्ते, सहकाराः आम्राः, तैलानि परिपेशलानि सुकोमलानि पूगफलानि च येषु प्रचुराः उत्पद्यन्ते, येषु च कर्पूरपांशुभिः कर्पूररजोभिः परिवासितानि चन्दनानि समृद्धानि भवन्ति। एतादृशस्य ग्रीष्मसमयस्य कल्याणं भवतु। चिरं तिष्ठतु ग्रीष्मर्तुरिति भावः ॥ ५॥

विदूषक—ऐसा मत कहो--

मित्र ! पान की बेल के पीले रंग के पत्तों से युक्त, आम, तेल और कोमल पूगफलों (सुपारियों) वाले तथा कपूर की सुगन्ध से युक्त चन्दन जिनमें खूब पाया जाता है ऐसे गर्मी के दिनों का कल्याण हो—अर्थात् यह ग्रीष्मऋतु चिरकाल तक बनी रहे ॥ ५॥

राजा—इस ऋतु में यह सुन्दरता है।

टिप्पणी--पाण्डुभिः छविभिः छुरिताः नागलतानाम् दलाः येषु तेषाम् = पाण्डुच्छविच्छुरितनागलतादलानाम् = पाण्डुप्रभाव्याप्तताम्बूलीपर्णानाम्। सहकाराः तैलानि परिपेशलानि पूगफलानि च येषु तेषाम् सहकारतैलपरिपेशलपूगफलानाम् = आम्रतैलसुकोमलगुवाकफलानाम्। कर्पूरपांशुभिः परिवासितानि चन्दनानि येषु तेषाम् = कर्पूरपांशुपरिवासितचन्दनानाम् = कर्पूररेणुसुवासितचन्दनानाम्। निदाघदिवसानाम् = ग्रीष्मदिनानाम्। भद्रम् = कल्याणम् ॥ ५॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

[सपञ्चमतरङ्गिणः श्रवणशीतला वेणवः
समं शिशिरवारिणा वदनशीतला वारुणी।
स चन्दनघनस्तनी शयनशीतला कामिनी
निदाघदिवसौषधं सहजशीतलं कस्यापि ॥ ६ ॥]

अवि अ [अपि च]—

लीलुत्तंसो सिरीसं सिहिणपरिसरे सिन्दुवाराणँ हारो
अंगे ओल्लं वरिल्लं रमणपणइणी मेहला उप्पलेहिं।
दोसुं दोकन्दलीसुं णवविसवलआ कामवेज्जो मणोज्जो
तावातंकक्खमाणं महुसमए गदे एस वेसोऽब्बलाणं ॥ ७ ॥

अन्वयः—सपञ्चमतरङ्गिणः श्रवणशीतलाः वेणवः, शिशिरवारिणा समम् वदनशीतला वारुणी, सचन्दनघनस्तनी शयनशीतला कामिनी, 'एतत् त्रयम्' कस्यापि सहजशीतलम् निदाघदिवसौषधम् 'अस्ति'।

सरलार्थः—पञ्चमस्वरयुक्तानि रागवन्ति श्रुतिमधुराणि वंशीवाद्यानि, नीहारजलेन सह मुखशीतलकरी मदिरा, चन्दनचर्चितकठोरकुचवती शय्यासुखदायिनी कामिनी एतत् त्रयम् स्वभावशीतलम् वस्तु कस्यापि भाग्यवत एव ग्रीष्मोपचाररूपेण उपलब्धं भवतीत्यर्थः ॥ ६ ॥

रागमय, पञ्चमस्वर के साथ तथा कानों को मधुर लगने वाला वंशीरव, शीतल जल के साथ मुख को ठण्डा करने वाली मदिरा, चन्दन लगे हुए तथा कठोर स्तनों वाली और शय्या में सुख देने वाली कामिनी ये तीन स्वभाव से ही शीतल चीज किसी भाग्यवान् को ही ग्रीष्मऋतु में उपचार रूप से मिलती हैं ॥ ६ ॥

और भी—

टिप्पणी—पञ्चमेन सहिताः सपञ्चमाः, सपञ्चमाश्च तरङ्गिणश्च सपञ्चमतरङ्गिणः = पञ्चमस्वरयुक्ताः, रागवन्तश्च। श्रवणयोः शीतलाः = श्रवणशीतलाः = कर्णमधुराः। वेणवः = वंशीरवाः। शिशिरवारिणा समम्—समम् के योग में तृतीया। वदनाय शीतला = वदनशीतला = मुखशीतलकारी। वारुणी = सुरा। चन्दनेन सहितौ = सचन्दनौ, सचन्दनौ घनौ च स्तनौ यस्याः सा सचन्दनघनस्तनी = चन्दनचर्चितकठोरस्तनी। शयने शीतला = शयनशीतला = शय्यासुखदायिनी। निदाघदिवसानाम् औषधम् = निदाघदिवसौषधम् = ग्रीष्मोपचारः ॥ ६ ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

[लीलोत्तंसः शिरीषं स्तनपरिसरे सिन्दुवाराणां हारः
अङ्गे आर्द्रं वस्त्रं रमणप्रणयिनी मेखलोत्पलैः ।
द्वयोर्दोःकन्दल्योर्नवबिसवलया कामवैद्यो मनोज्ञः
तापातङ्कक्षमाणां मधुसमये गते एष वेशोऽवलानाम् ॥ ७ ॥]

विदूषकः--अहं उण भणामि । [अहं पुनर्भणामि]--

मज्झण्ह लण्ह घणचन्दणपंकिलाणं
साअं णिसेविदणिरन्तरमज्जणाणं ।
सज्जासु वीअणजवारिकणुक्खिदाणं
दासत्तणं कुणइ पञ्चसरोऽवलाणं ॥ ८ ॥

अन्वयः—मधुसमये गते लीलोत्तंसः शिरीषम्, स्तनपरिसरे सिन्दुवाराणां हारः, अङ्गे आर्द्रं वस्त्रम्, उत्पलैः रमणप्रणयिनी मेखला; द्वयोः दोःकन्दल्योः नवबिसवलया, तापातङ्कक्षमाणाम् अबलानाम् एष मनोज्ञः वेशः कामवैद्यः ।

सरलार्थः—वसन्तकाले समाप्ते सति लीलया कर्णयोः शिरीषधारणम्, वक्षःस्थले सिन्दुवारपुष्पाणाम् हारस्य धारणम्, अङ्गे जलसिक्तं वस्त्रम्, जघनयोः रत्नयुक्ता काञ्ची, द्वयोः भुजलतयोः नवानां मृणालतन्तूनां कङ्कणानि-एतादृश एव मनोहरः वेशः ग्रीष्मतापपीडितानाम् अबलानाम् कामावेशशान्ति करोति ॥ ७ ॥

कानों में शिरीष का फूल लगाना, वक्षःस्थल पर सिन्दुवार के फूलों का हार धारण करना, शरीर पर गीले वस्त्र रखना, रत्न जड़ी हुई करधनी पहिनना तथा लता जैसी दोनों भुजाओं में नवीन मृणाल-तन्तुओं के कङ्कण पहिनना-इस तरह का सुन्दर वेश ग्रीष्म-ऋतु में गर्मी के कष्ट को सहन करने वाली अबलाओं के कामावेश को शान्ति पहुँचाता है ॥ ७ ॥

विदूषक—मैं तो यह कहता हूँ—

टिप्पणी—शिरीषम् = सिरस का फूल । उत्तंसः = कानों का एक आभूषण । स्तनपरिसरे = स्तनों पर । रमणयोः प्रणयिनी = रमणप्रणयिनी = जङ्घाओं से प्रीति करनेवाली दोःकन्दल्योः = भुजलताओं पर । नवानां बिसानां वलयाः = नवबिसवलयाः = सरसमृणालतन्तुकङ्कणानि । तापस्य आतङ्कं क्षमन्ते इति तेषां तापातङ्कक्षमाणां = तापक्लेशसहनानाम् कामवैद्यः = कामशान्तिकरः । मधुसमयः = वसन्तसमयः ॥ ७ ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

[मध्याह्नश्लक्ष्णघनचन्दनपङ्किलानां
सायं निषेवितनिरन्तरमज्जनानाम् ।
शय्यासु व्यजनजवारिकणोक्षितानां
दासत्वं करोति पञ्चशरोऽबलानाम् ॥ ८ ॥]

राजा—(स्मरणमभिनीय[1])—

पच्चंगं णवरूअभंगिघडणारम्मे जणे संगमो
जाणं ताणँ खणं व्व झत्ति दिअहा वट्ठन्ति दीहा अपि ।
जाणं ते अ मणम्मि देन्ति ण रइं चित्तस्स सन्दाविणो
जाणं जान्ति जगम्मि दीहरतमा मासोवमा बासरा ॥ ९ ॥

अन्वयः—पञ्चशरः मध्याह्नश्लक्ष्णघनचन्दनपङ्किलानाम्, सायम् निषेवितनिरन्तरमज्जनानाम्, शय्यासु व्यजनजवारिकणोक्षितानाम् अबलानाम् दासत्वम् करोति ।

सरलार्थः—कामदेवः मध्याह्ने चिक्कणैः सान्द्रैश्च चन्दनैः यासामङ्गानि अनुलिप्तानि सन्ति, सायं च याः निरन्तरं जलावगाहनं कुर्वन्ति, शय्यासु च याः व्यजनमुक्तैः वारिकणैः सिक्ताः भवन्ति तासां कामिनीनां सेवां करोति ॥ ८ ॥

दोपहर में जो चिकना और गाढ़ा चन्दन लगाती हैं, सायंकाल जो लगातार नहाती रहती हैं, शय्याओं पर पंखे से निकले हुए जल के कणों से जिनके शरीर भींगे रहते हैं—ऐसी स्त्रियों का कामदेव दास बना रहता है ॥ ८ ॥

राजा—(स्मृति का अभिनय कर)—

टिप्पणी—श्लक्ष्णानि घनानि च चन्दनानि श्लक्ष्णघन—चन्दनानि, मध्याह्न श्लक्ष्णघनचन्दनैः पङ्किलाः, तासां मध्याह्नश्लक्ष्णघनचन्दनपङ्किलानाम् = मध्याह्नचिक्कणसान्द्रचन्दनानुलिप्तानाम्—दोपहर को चिकने और गाढ़े चन्दन से लिप्त । निषेवितं निरन्तरं मज्जनम् याभिः तासाम् = निषेवितनिरन्तरमज्जनानाम् = कृतनित्यजलावगाहनानाम्—लगातार जल में खेलती हुई । व्यजनाज्जाताः = व्यजनजाः, तादृशाः ये वारिकणाः तैः उक्षितानाम् = व्यजनजवारिकणोक्षितानाम्—व्यजनोत्पन्नजलबिन्दुसिक्तानाम् = व्यजन से उत्पन्न जल के कणों से सिक्त । पञ्चशरः = कामदेव ॥ ८ ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

१. अभिनीय = अभिनय कर—अभि √नी + य—ल्यबन्त ।

[प्रत्यङ्गं नवरूपभङ्गिघटनारम्ये जने सङ्गमो
येषां तेषां क्षणमिव झटिति दिवसा वर्त्तन्ते दीर्घा अपि ।
येषां ते च मनसि ददति न रतिं चित्तस्य सन्तापिनः
तेषां यान्ति जगति दीर्घतमा मासोपमा वासराः ॥ ९ ॥]

राजा--(विदूषकं प्रति) वअस्स ! अत्थि तग्गदा का वि वत्ता ? [वयस्य ! अस्ति तद्गता काऽपि वार्त्ता ?]

विदूषकः--अत्थि, सुणादु पिअवअस्स, कधेमि सुहासिदं दे । जदो पहुदि कप्पूरमञ्जरी रक्खाभवणादो सुरंगादुआरे देवीए दिट्ठा, तदो पहुदि तं सुरंगादुआरं देवीए बहलसिलासञ्चएण णीरन्धं कदुअ पिहिदं । अणंग-

---

अन्वयः—येषाम् प्रत्यङ्गम् नवरूपभङ्गिघटनारम्ये जने सङ्गमः (भवति) तेषाम् दीर्घाः अपि दिवसाः झटिति क्षणमिव वर्तन्ते । ते च येषाम् मनसि रतिम् न ददति, जगति तेषाम् चित्तस्य सन्तापिनः वासराः मासोपमा यान्ति ।

सरलार्थः—येषाम् जनानाम् सर्वाङ्गसुन्दरेण प्रियेण सह सहवासः भवति, तेषाम् दीर्घाः अपि दिवसाः शीघ्रम् क्षणमिव गच्छन्ति । प्रियजनाः येषाम् चित्ते सङ्गमानन्दं न ददति, तेषां मनसः दुःखदायिनः दिवसाः संसारे माससदृशाः अतिविस्तृताश्च जायन्ते ॥ ९ ॥

जिन लोगों का अंग-प्रत्यंग के सौन्दर्य से युक्त अपने प्रियजन के साथ संगम हो जाता है, उनके लम्बे-लम्बे दिन शीघ्र ही क्षणों की तरह बीत जाते हैं और प्रियजन जिनके चित्तों को अपने मिलने का आनन्द नहीं देते, संसार में उनके चित्त को दुःख पहुँचाने वाले दिन महीनों के बराबर अत्यन्त लम्बे हो जाते हैं ॥ ९ ॥

राजा—(विदूषक से) मित्र ! कुछ उसका भी हाल मालूम है ?

विदूषक—हाँ, है, मित्र सुनो ! तुम्हारे लिए शुभ समाचार सुनाता हूँ । जब से महा-रानी ने कर्पूरमञ्जरी को रक्षाभवन से सुरंगाद्वार पर जाती हुई देखा, तब से उस सुरंगा के

टिप्पणी—अङ्गमङ्गं प्रति = प्रत्यङ्गम् (अव्ययीभाव) हर अंग में । नवानाम् रूपभंगि-नाम् घटनया रम्ये = नवरूपभंगिघटनारम्ये = अभिनवसौन्दर्यरचनामनोहरे—अपूर्व सौन्दर्य छटाओं की रचना से सुन्दर । रतिम् = सङ्गमानन्दम्—मिलने का आनन्द । सन्तापिनः = दुःखदायिनः । मासैः उपमा अस्ति येषां ते मासोपमाः = माससदृशाः । अतिशयेन दीर्घाः = दीर्घतमाः = अत्यायता । यान्ति = बीतते हैं √या धातु से प्रथम पु० बहु० लट्लकार ॥ ९ ॥

टिप्पणी--सुभाषितम् = शुभ समाचार । शिलानां सञ्चयः = शिलासञ्चयः, बहुलश्चासौ शिलासंचयः, तेन—बहुलशिलासञ्चयेन = प्रभूतशिलासमूहेन । रन्ध्रेभ्यः निर्गतम् (रहि-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सेणा कलिंगसेणा कामसेणा वसन्तसेणा विब्भमसेण त्ति पञ्चसेणाणामधे-आओ चामरधारिणीओ फारप्फुरक्किदकरवालहत्थपाइक्कसहस्सेण सह कारामन्दिरस्स रक्खाणिमित्तं पुव्वदिसाए णिउत्ताओ। [अस्ति, शृणोतु प्रियवयस्यः, कथयामि सुभाषितं ते। यतः प्रभृति कर्पूरमञ्जरी रक्षाभवनात् सुरङ्गाद्वारे देव्या दृष्टा, ततः प्रभृति तत् सुरङ्गाद्वारं देव्या बहुलशिलासञ्चयेन नीरन्ध्रं कृत्वा पिहितम्। अनङ्गसेना, कलिङ्गसेना, कामसेना, वसन्तसेना, विभ्रमसेनेति पञ्च सेनानामधेयाश्चामरधारिण्यः स्फारस्फुरत्करवालहस्तपदाति-सहस्रेण सह कारामन्दिरस्य रक्षानिमित्तं पूर्वदिशि नियुक्ताः।]

अणंगलेहा चित्तलेहा चन्दलेहा मिअंकलेहा बिब्भमलेहत्ति लेहाणाम-धेआओ पञ्च सेरन्धाओ पुंखिदसिलीमुहधणुहत्थेण णिबिडणिबद्धतूणीरदु-द्धरेण धाणुक्कसहस्सेण समं दक्खिणाए दिसाए णिवेसिदाओ। [अनङ्ग-लेखा, चित्रलेखा, चन्द्रलेखा, मृगाङ्कलेखा, विभ्रमलेखेति, लेखानामधेयाः पञ्च सैरिन्ध्र्यः पुङ्खितशिलीमुखधनुर्हस्तेन निबिडनिबद्धतूणीरदुर्द्धरेण धानुष्कसहस्रेण समं दक्षिणस्यां दिशि निवेशिताः।]

दरवाजे को बहुत पत्थरों से नीरन्ध्र कर के ढक दिया है और अनंगसेना, कलिंगसेना, काम-सेना, वसन्तसेना तथा विभ्रमसेना नाम वाली पाँच चँवर डुलाने वालियों को अत्यन्त चम-कती हुई तलवार हाथ में लिये हजार पैदल सिपाहियों के साथ कारागार की रक्षा के लिए पूर्वदिशा में नियुक्त कर दिया है।

अनंगलेखा, चित्रलेखा, चन्द्रलेखा, मृगाङ्कलेखा और विभ्रमलेखा—इन लेखा नाम वाली पाँच सैरिन्ध्रियों को बाण चढ़े हुए धनुष को हाथ में लिये हुए और खूब बंधे हुए तरकस से सज्जित हजार धनुर्धारियों के साथ दक्षिण में नियुक्त कर दिया है।

तम्) नीरन्ध्रम् = छिद्ररहितम्। पिहितम् = आच्छादितम्—ढक दिया। स्फारम् अत्यन्तम् स्फुरन् करवालः हस्ते यस्य तत् स्फारस्फुरत्करवालहस्तम्, तादृशं पदातिसहस्रम् तेन स्फारस्फुरत्करवालहस्तपदातिसहस्रेण=अतिदीप्यमानखड्गहस्तपादचारिसैन्यसमूहेन। कारा-मन्दिरम् = बन्दीगृहम्।

टिप्पणी—सैरिन्ध्री = ऐसी स्त्री जो दूसरे के घर रहे, स्वतन्त्र हो और केश झाड़ना, गूंथना आदि शिल्पकार्य करती हो। पुङ्खितः संहितः शिलीमुखः यस्मिन् तत् पुङ्खितशिली-मुखम्, तादृशं धनुः हस्ते यस्य तेन पुङ्खितशिलीमुखधनुर्हस्तेन = संहिताबाणधनुर्हस्तेन। निबिडः निबद्धः तूणीरस्तेन दुर्द्धरेण=निविडनिबद्धतूणीरदुर्द्धरेण = दृढनिबद्धतूणीरदुरासदेन। धानुष्कानाम् सहस्रं तेन धानुष्कसहस्रेण = हजार धनुर्धारियों के द्वारा।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कुन्दमाला चन्दणमाला कुबलअमाला कञ्चणमाला बउलमाला मंगलमाला माणिक्कमाला- त्ति सत्त मालत्तिणामधेआओ णवणिसिदकुन्तहत्थपाइक्कसहस्सेण समं ताम्बूलकरंकबाहिणीओ पच्छिमाए दिसाए णिवेसिदाओ। [**कुन्दमाला, चन्दनमाला, कुवलयमाला, काञ्चनमाला, बकुलमाला, मङ्गलमाला, माणिक्यमालेति सप्त मालेतिनामधेया नवनिशितकुन्तलहस्तपदातिसहस्रेण समं ताम्बूलकरङ्कवाहिन्यः पश्चिमायां निवेशिताः।**]

अणंगकेली पुक्कहकेली कन्दप्पकेली सुन्दरकेली कन्दोट्टकेलि त्ति पञ्च केलित्तिणामधेआओ मज्जण कारिणीओ फलअखग्ग कम्पबिन्दुरिल्लेण पाइक्कसहस्सेण समं उत्तरदिसाए आणत्ताओ। [**अनङ्गकेलिः, पुष्करकेलिः, कन्दर्पकेलिः, सुन्दरकेलिः, उत्पलकेलिरिति पञ्च केलीतिनामधेया मज्जनकारिण्यः फलकखड्गकम्पभीषणेन पदातिसहस्रेण सममुत्तरदिशि आज्ञप्ताः।**]

ताणं वि उण उवरि मदिरावदी केलिवदी कल्लोलवदी तरंगवदी अणंगवदित्ति पञ्च वदित्तिणामधेआओ परिचारिआ कुमारीओ कणअचित्तदण्डहत्थाओ सुहासिअपाढिआओ वदीणामधेआओ सेणाए अज्झक्खीकिदा-

---

कुन्दमाला, चन्दनमाला, कुवलयमाला, काञ्चनमाला, वकुलमाला, मङ्गलमाला और माणिक्यमाला—इन सात माला नाम वाली पानदान उठाने वालियों को नये तेज किये हुए भाले हाथ में लिये हुए हजार पैदल सिपाहियों के साथ पश्चिम में नियुक्त कर दिया है।

अनंगकेलि, पुष्करकेलि, कन्दर्पकेलि, सुन्दरकेलि, उत्पलकेलि—इन पाँच केलि नाम वाली स्नान कराने वालियों को ढाल और तलवार लिये हजार पैदल सिपाहियों के साथ उत्तर दिशा में नियुक्त कर दिया है।

उनके भी ऊपर मदिरावती, केलिवती, कल्लोलवती, तरंगवती और अनंगवती—इन वती

टिप्पणी—नवाश्च निशिताश्च कुन्ताः = नवनिशितकुन्ताः। नवनिशितकुन्ताः हस्तेषु येषां तत् नवनिशितकुन्तहस्तम्, तादृशं पदातिसहस्रम् तेन नवनिशितकुन्तहस्तपदातिसहस्रेण = नवतीक्ष्णकुन्तहस्तपदातिसमूहेन—नये और तेज भाले हाथ में लिये हुए हजार पैदल सिपाहियों के द्वारा। ताम्बूलानां करंकम् वहन्तीति याः ताः ताम्बूलकरंकवाहिन्यः = पानदान को उठानेवाली स्त्रियाँ। ताम्बूलकरंकः = पानदान।

टिप्पणी—मज्जनं कारयन्ति इति याः ता मज्जनकारिण्यः = स्नापयित्र्यः—स्नान कराने वाली स्त्रियाँ। फलकस्य खड्गस्य च कम्पेन भीषणं तेन फलकखड्गकम्पभीषणेन = फलकखड्गश्चालनभयंकरेण। फलकम् = ढाल।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

टिप्पणी—परिचरन्तीति याः परिचारिकाः, तासां कुमार्यः = परिचारिकाकुमार्यः =

ओत्ति । [तासामपि पुनरुपरि मदिरावती, केलिवती, कल्लोलवती, तरङ्गवती, अनङ्गवतीति पञ्च वतीतिनामधेयाः परिचारिकाकुमार्यः कनकवेत्रदण्डहस्ताः सुभाषितपाठिका वतीनामधेयाः सेनायाः अध्यक्षीकृता इति ।]

राजा—अहो ! देवीए सामग्गी अन्तेउरोचिदा । [अहो ! देव्याः सामग्री अन्तःपुरोचिता ।]

विदूषकः—भो वअस्स ! एसा देवीए सारंगिआ णाम सही किंपि णिवेदेदुं पेसिदा । [वयस्य ! एषा देव्या सारङ्गिकानाम सखी किमपि निवेदितुं प्रेषिता ।]

(ततः प्रविशति सारङ्गिका)

सारङ्गिका—जअदु जअदु भट्टा । देव ! देवी विण्णवेदि—'अज्ज चतुत्थदिअहे भविअवडसाइत्तीमहूसवोवकरणाइं केलिविमाणप्पसादं आरुहिअ प्पेक्खिदव्वाइं' त्ति । [जयतु जयतु भर्त्ता ! देव ! देवी विज्ञापयति—'अद्य चतुर्थदिवसे भाविवटसावित्रीमहोत्सवोपकरणानि केलिविमानप्रासादमारुह्य प्रेक्षितव्यानि' इति ।]

नाम वाली पांच कुमारी परिचारिकाओं को जो कि हाथ में सोने के डण्डे लिये हुई हैं और सुभाषित पढ़ती रहती हैं–सेना का अध्यक्ष बना दिया है ।

राजा—अरे ! देवी की परिचर्या का सामान अन्तःपुर के उपयुक्त ही है ।

विदूषक—मित्र ! (देखो) महारानी ने इस सारंगिका नाम की सखी को कुछ कहने के लिए भेजी है ।

(तब सारंगिका आती है)

सारङ्गिका—महाराज की जय हो । महाराज ! महारानी कहती हैं कि आज चौथे

सेविकाकन्यकाः । कनकस्य वेत्रदण्डः हस्ते यासां ताः = कनकवेत्रदण्डहस्ताः = सुवर्णवेत्रदण्डपाणयः । सुभाषितानि पठन्तीति याः ताः सुभाषितपाठिकाः = स्तुतिपाठिकाः । अध्यक्षीकृताः = अनध्यक्षाः अध्यक्षाः कृताः इति अध्यक्षीकृताः (च्विप्रत्ययान्त)—अध्यक्ष बना दिया गया है ।

टिप्पणी—सामग्री = परिचर्या का सामान । अन्तःपुरस्य उचिता = अन्तपुरोचिता = अवरोधसदृशी–अन्तःपुर (रनिवास) के अनुकूल ।

टिप्पणी—निवेदितुम् = कहने को, निपूर्वक √विदि (चुरादि) से तुम् । प्रेषिता = भेजी, √ प्रेष्+इ+त । (क्तप्रत्ययान्त) ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

राजा—जं देवी आणवेदि। [यत् देवी आज्ञापयति।]

(चेटी निष्क्रान्ता ! उभौ प्रासादाधिरोहणं नाटयतः)

(ततः प्रविशति चर्चरी)

विदूषकः—

मुत्ताहलिल्लाहरणुच्चआओ लासावसाणे चलिअंसुआओ।
सिञ्चन्ति अण्णोण्णमिमीअ पेक्ख जन्ताजलेहिं मणिभाजणेहिं ॥ १० ॥

[मुक्ताफलाभरणोच्चया लास्यावसाने चलितांशुकाः।
सिञ्चन्त्योऽन्यमिमाः प्रेक्षस्व यन्त्रजलैर्मणिभाजनैः ॥ १० ॥]

अन्वयः—मुक्ताफलाभरणोच्चयाः चलितांशुकाः इमाः लास्यावसाने यन्त्रजलैः मणिभाजनैः अन्योऽन्यम् सिञ्चन्ति, पश्य।

सरलार्थः—मौक्तिकहारादिभिः विभूषिताः, प्रचलद्वसनाः इमाः नट्यः नृत्यसमाप्तौ यन्त्रनिर्गतजलैः मणिमयपात्रैः परस्परं सिञ्चन्ति, त्वं पश्येदं दृश्यमिति भावः ॥ १० ॥

दिन होने वाले वटसावित्री के महोत्सव की शोभा को महाराज केलिविमानप्रासाद पर चढ़ कर देखें।

राजा—जो महारानी की आज्ञा।

(चेटी बाहर जाती है। दोनों महल पर चढ़ने का अभिनय करते हैं)

(तब चर्चरी–नर्तकियाँ आती हैं)

विदूषक—मोतियों के आभूषण धारण किये हुए तथा जिनके वस्त्र हवा में उड़ रहे हैं देखो ये नर्तकियाँ नृत्य समाप्त होने पर यन्त्र से निकले जल से युक्त माणिक्य पात्रों से एक दूसरे को भिगो रही हैं ॥ १० ॥

टिप्पणी—चर्चरी = एक प्रकार का गाना गाने और नाचने वालियों की मण्डली।

टिप्पणी—मुक्ताफलानि आभरणोच्चयाः यासां ताः मुक्ताफलाभरणोच्चयाः = मौक्तिकहारादिभिरलंकृताः। मोतियों के आभूषणों से सजी हुई। उच्चयः = सञ्चयः। लास्यम् = कोमलनृत्यम्। चलितानि अंशुकानि यासां ताः = चलितांशुकाः = उड़ते हुये वस्त्रों वाली। मणिभाजनैः = मणियों के बर्तनों से। सिञ्चन्ति = भिगोती हैं √ सिच क्षरणे–(तुदादि लट् लकार–प्रथम पु० बहुव०) ॥ १० ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इदो अ [इतश्च]—

परिब्भमन्तीअ विचित्तबन्धं इमाउ दोसोलह णच्चणीसो।
खेलन्ति तालाणुगदप्पदाओ तुहंगणे दीसइ दण्डरासों॥ ११॥
[परिभ्रमन्त्यो विचित्रबन्धमिमा द्विषोडश नर्त्तक्यः।
खेलन्ति तालानुगतपदास्तवाङ्गने दृश्यते दण्डरासः॥ ११॥]
समंससीसा समबाहुहत्था रेहाविसुद्धा अपरा अ देन्ति।
पन्तीहिं दोहिं लअतालबन्धं परप्परं साहिमुहीउ चल्लिं॥ १२॥
[समांसशीर्षाः समबाहुहस्ता रेखाविशुद्धा अपराश्च ददति।
पाङ्क्तिभ्यां द्वाभ्यां लयतालबन्धं परस्परं साभिमुखा भवन्ति॥ १२॥]

अन्वयः—इमाः द्विषोडश नर्तक्यः विचित्रबन्धनम् परिभ्रमन्त्यः तालानुगतपदाः खेलन्ति, तव अङ्गने दण्डरासः दृश्यते।

सरलार्थः—इमाः द्वात्रिंशत् नर्तक्यः विचित्रेण बन्धेन चरणविक्षेपं तालानुकूलं च कृत्वा परिभ्रमन्ति। अतः तव चत्वरे दण्डकारेण स्थित्वा शृङ्खलाबन्धवत् क्रीडनविशेषः दृश्यते॥ ११॥

अन्वयः—अपराः समांसशीर्षाः समबाहुहस्ताः रेखाविशुद्धाः द्वाभ्याम् पङ्क्तिभ्यां लयतालबन्धम् ददति, परस्परम् साभिमुखाः भवन्ति।

सरलार्थः—अपराः नर्तक्य स्कन्धौ शिरांसि च समानि कृत्वा, बाहू करावपि

इधर तो—

ये बत्तीस नर्तकियाँ विचित्र बन्ध बनाकर घूम रही हैं, इनके पैर भी ताल के मुताबिक पड़ रहे हैं। इसलिए तुम्हारे आँगन में दण्डरास-सा दिखाई पड़ रहा है॥ ११॥

कुछ नर्तकियाँ कन्धे और सिर बराबर किये हुए तथा भुजाएँ और हाथों को भी एक-सी स्थिति में रखे हुए और जरा भी गलती न करते हुए दो पंक्तियों में लय और ताल के मेल के साथ चलती हैं और एक दूसरे के सामने आती हैं॥ १२॥

टिप्पणी—द्विषोडश = द्वात्रिंशत्—बत्तीस। तालेन अनुगतं पदं यासां ताः = तालानुगतपदाः = लयानुकूलचरणविक्षेपाः—ताल के अनुकूल जिनके पैर पड़ते हैं। दण्डरासः = दण्डकारेण स्थित्वा शृङ्खलाबन्धवत् क्रीडनविशेषः—दण्ड के आकार से खड़े होकर शृङ्खलाबन्ध की तरह खेल॥ ११॥

टिप्पणी—समम् अंसशीर्षम् यासां ताः = समांसशीर्षाः = तुल्यस्कन्धशिरसः = बराबर कन्धे और सिर वाली। समम् बाहुहस्तम् यासां ताः = समबाहुहस्ताः = तुल्यबाहुकराः। रेखया विशुद्धाः = रेखाविशुद्धाः = अणुमात्रमपि न स्खलिताः। रेखा तक का विचार

CC-0. Nepal Sanskrit Academy, Kathmandu. Collection

मोत्तूण अण्णा मणिवारआइं जन्तेहिं धारासलिलं खिवन्ति ।
पडन्ति ताओ अ पिआणमंगे मणोहुओ वारुणवाणकप्पा ॥ १३ ॥
[**मुक्त्वा अन्या मणिवारणानि यन्त्रैर्धारासलिलं क्षिपन्ति ।**
पतन्ति ताश्च प्रियाणामङ्गे मनःभुवो वारुणवाणकल्पाः ॥ १३ ॥]
इमा मसीकज्जलकालकाआ तिक्खच्छचावा अ विलासिणीओ ।
पुलिन्दरूवेण जणस्स हासं समोरपिच्छाहरणा कुणन्ति ॥ १४ ॥
[**इमा मसीकज्जलश्यामकायास्तीक्ष्णाक्षिचापाश्च विलासिन्यः ।**
पुलिन्दरूपेण जनस्य हासं समयूरपिच्छाभरणाः कुर्वन्ति ॥ १४ ॥]

च समौ विधाय रेखामात्रमपि स्खलिताः न भूत्वा द्वाभ्यां पङ्क्तिभ्यां लयस्य तालस्य च बन्धनम् ददति, परस्परं साम्मुख्येन तिष्ठन्ति च ॥ १२ ॥

अन्वयः—अन्याः मणिवारणानि मुक्त्वा यन्त्रैः धारासलिलं क्षिपन्ति । ताः च प्रियाणामङ्गे मनोभुवः वारुणवाणकल्पाः पतन्ति ।

सरलार्थः—अन्याः नर्तक्यः रत्नखचितकवचानि त्यक्त्वा यन्त्रैः धारासलिलं मुञ्चन्ति । ताः सलिलधाराश्च तासां कान्तानाम् अङ्गे कामदेवस्य वारुणास्त्रसदृशाः भूत्वा पतन्ति ॥ १३ ॥

अन्वयः—मसीकज्जलश्यामकायाः तीक्ष्णाक्षिचापाः समयूरपिच्छाभरणाः इमा विलासिन्यः पुलिन्दरूपेण जनस्य हासं कुर्वन्ति ।

सरलार्थः—मसीवत् कज्जलवच्च श्यामशरीराः, चापमिव तीक्ष्णे नेत्रे धार-

---

कुछ नर्तकियाँ रत्न जड़े हुए कवच उतार कर यन्त्रों से पानी की धारें छोड़ती हैं। पानी की वे धारें उनके प्रेमियों के शरीर पर कामदेव के वारुण वाण की तरह पड़ती हैं ॥१३॥

स्याही और काजल की तरह कृष्ण शरीर वाली, धनुष की तरह तिरछी नजरें वाली और मोर के पंखों के आभूषणों से युक्त ये विलासिनी स्त्रियाँ शिकारी के रूप से लोगों को हँसाती हैं ॥ १४ ॥

करती हुई । लयस्य तालस्य च बन्धो यत्र तत् यथा तथा लयतालबन्धम् = लय और ताल के बन्ध के साथ ॥ १२ ॥

टिप्पणी—मणीनां वारणानि = मणिवारणानि = रत्नखचितकवचानि—रत्नों से जड़े हुए कवच । मुक्त्वा = छोड़कर—√मुच्+त्व । वारुणवाणकल्पाः = वारुणास्त्रसदृशाः । मनोभुवः = कामदेव का ॥ १३ ॥

टिप्पणी—मसीवत् कज्जलवच्च श्यामाः कायाः यासां ताः = मसीकज्जलश्यामकायाः = कृष्णवर्णाः—स्याही और काजल की तरह शरीर वाली । तीक्ष्णे अक्षिणी चाप इव यासां

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

हत्थे महामंसबलीधराओ हुंकारफेक्कारखा रउद्दा।
णिसाअरीणं पडिसी सएहिं अण्णा मसाणाभिणअं कुणन्ति ॥
[हस्ते महामांसवलिधारिण्यो हुङ्कारफेत्कारखा रौद्राः।
निशाचरीणां प्रतिशीर्षकैरन्याः श्मशानाभिनयं कुर्वन्ति ॥ १५ ॥]
का वि वाइअकरालहुडुक्का रम्ममद्दलरएण मिअच्छी।
भूल हिं परिवाडिअलाहिं चेटिकम्मकरणम्मि पउट्टा ॥ १६ ॥
[काऽपि वादितकरालहुडुक्का रम्यमर्दलरवेण मृगाक्षी।
भ्रूलताभ्यां परिपाटीचलाभ्यां चेटीकर्मकरणे प्रवृत्ता ॥ १६ ॥]

यन्त्यः तथा मयूरपिच्छानामाभरणेन शोभिताः इमाः कामिन्यः व्याधरूपेण जनं हसयन्ति ॥ १४ ॥

सरलार्थः—अन्याः नार्यः हस्ते नरमांसमेव उपहाररूपेण धारयन्त्यः, हुङ्काररूपेण च शृगालध्वनिं कुर्वन्त्यः अत एव भीषणाः सत्यः राक्षसीनां प्रतिरूपैः श्मशानस्य प्रदर्शनव्यापारं कुर्वन्ति ॥ १५ ॥

अन्वयः—काऽपि मृगाक्षी रम्यमर्दलरवेण वादितकरालहुडुक्का परिपाटिचलाभ्याम् भ्रूलताभ्याम् चेटीकर्मकरणे प्रवृत्ता।

सरलार्थः—कापि मृगनयनी नर्तकी मधुरेण मर्दलाख्यवादित्रस्य शब्देन द्वारविष्कम्भं भीषणं वादयन्ती परिपाटीचलाभ्याम् भ्रूलताभ्यां सहचरीणां कर्मकरणे प्रवृत्ता दृश्यते ॥ १६ ॥

कुछ स्त्रियाँ हाथ में नरमांस को ही उपहाररूप से धारण किये हुये और हुंकाररूप से सियारों का सा शब्द करती हुई तथा रौद्ररूप बनाकर राक्षसियों के चेहरे लगाकर श्मशान का अभिनय करती हैं ॥ १५ ॥

कोई हरिणी जैसे नेत्रों वाली नर्तकी मर्दल बाजे के मधुर शब्द से द्वारविष्कम्भ को जोर जोर से बजाती हुई अपनी चञ्चल भौंहों से चेटी-कर्म करने में लगी हुई है ॥ १६ ॥

ताः तीक्ष्णाक्षिचापाः = तीक्ष्णनेत्रकार्मुकाः—धनुष के समान तिरछे नेत्र वाली। मयूरपिच्छानाम् आभरणानि = मयूरपिच्छाभरणानि, तैः सहिताः = समयूरपिच्छाभरणाः = मयूरपिच्छविभूषिताः—मोर के पंखों से सजी हुई। पुलिन्दः = शिकारी ॥ १४ ॥

टिप्पणी—महामांसमेव बलिं धारयन्तीति महामांसबलिधारिण्यः = नरमांसोपहारयुक्ताः—मनुष्य के मांस को ही उपहाररूप में लिये हुये। हुंकाराः एव फेत्काररवाः यासां ताः हुंकारफेत्काररवाः = हुंकारशृगालध्वनियुक्ताः। प्रतिशीर्षकम् = चेहरा ॥ १५ ॥

टिप्पणी—मृगस्य इव अक्षिणी यस्याः सा मृगाक्षी = हरिणनयना। मर्दलः = एक

CC-0. Nepal Sanskrit Academy, Kathmandu Collection.

किंकिणीकिदरणज्झणसद्दा कण्ठगीदलअजन्तिदताला ।
जोगिणीवलअणच्चणकेलिं तालणेउररअं विरअन्ति ॥ १७ ॥
[किङ्किणीकृतरणज्झणशब्दाः कण्ठगीतलययन्त्रिततालाः ।
योगिनीवलयनर्त्तनकेलिं तालनूपुररवं विरचयन्ति ॥ १७ ॥]
कोदुहल्लवसचञ्चलवेसा वेणुवादणपरा अवराओ ।
कालवेसवसहासिदलोआ ओसरन्ति पणमन्ति हसन्ति ॥ १८ ॥
[कौतूहलवशचञ्चलवेषा वेणुवादनपरा अपराः ।
कालवेषवशहासितलोका अपसरन्ति प्रणमन्ति हसन्ति ॥ १८ ॥]

सरलार्थः—काश्चन स्निग्धाः किङ्किणीभिः रणज्झणशब्दं कुर्वन्त्यः, कण्ठेषु गीतस्य लयेन तालं च नियमयन्त्यः परिव्राजिकानां वलयरूपेण नृत्यन्त्यश्च तालपूर्वकं नूपुराणां रवं कुर्वन्त्यः विचरन्ति ॥ १७ ॥

सरलार्थः—काश्चन कामिन्यः कौतूहलस्य वशेन चञ्चलं वेशं विधाय, वेणुवादने च तत्पराः भूत्वा, मलिनवेशेन जनान् हसयन्त्यः अपसरन्ति प्रणमन्ति हसन्ति च ॥ १८ ॥

कुछ स्त्रियाँ क्षुद्रघण्टिकाओं से रणज्झण शब्द करती हुई, अपने कण्ठों के गीत के लय से ताल को जमाती हुई, परिव्राजिकाओं के वलय को बनाकर नाचती हुई ताल से अपने नूपुरों को बजाती हैं ॥ १७ ॥

कुछ स्त्रियाँ कुतूहलवश चंचल वेश बनाकर, वीणा बजाती हुई और मलिनवेश से लोगों को हंसाती हुई पीछे हटती हैं, प्रणाम करती हैं और हंसती हैं ॥ १८ ॥

प्रकार का ढोल । वादितं करालं हुडुक्कम् यया सा वादितकरालहुडुक्का = नादितभीषणद्वारविष्कम्भा = गुंजा दिया है भीषणरूप से द्वार-विष्कम्भ को जिसने हुडुक्कम् = एक प्रकार का बाजा ॥ १६ ॥

टिप्पणी—किङ्किणीभिः कृतः रणज्झणशब्दः याभिः ताः = किंकिणीकृतरणज्झणशब्दाः = क्षुद्रघण्टिकाकृतरणज्झणशब्दाः । कण्ठेषु गीतस्य लयेन यन्त्रितः तालः याभिः ताः = कण्ठगीतलययन्त्रिततालाः = कण्ठगीतलयनियमिततालाः । योगिनीनां वलयेन यत् नर्तकम् तदेव केलिः क्रीडा तम् = योगिनीवलयनर्तनकेलिम् = परिव्राजिकावलयनर्तनक्रीडाम् ॥ १७ ॥

टिप्पणी—कौतूहलस्य वशेन चञ्चलः वेशः यासां ताः = कौतूहलवशचञ्चलवेशाः वेणोः-वादने पराः = वेणुवादनपराः = वंशीवादनतत्पराः । कालवेशस्य वशेन हासिताः लोकाः याभिः ताः = कालवेषवशहासितलोकाः = मलिनवेषवशहासितजनाः ॥ १८ ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(प्रविश्य)

सारङ्गिका—(पुरोऽवलोक्य) एसो महाराओ उणो मरग-अकुञ्जं जेव्व गदो, कदलीघरं अ अणुप्पइट्टो; ता अग्गदो गदुअदेवीविण्णविअं विण्णवेमि। (उपसृत्य) जअदु जअदु देवो। देवी एदं विण्णवेदि जधा 'संझासमए जूअं मए परिणेदव्वा'। [**एष महाराजः पुनर्मरकतकुञ्जमेव गतः कदलीगृहञ्च अनुप्रविष्टः; तदग्रतो गत्वा देवीविज्ञापितं विज्ञापयामि।** (उपसृत्य) **जयतु जयतु देवः। देवी इदं विज्ञापयति यथा 'सन्ध्यासमये यूयं मया परिणेतव्याः'।**]

विदूषकः—भो ! किं इदं अकालकोहण्डपडणं ?। [**भोः किमेतदकालकूष्माण्डपतनम् ?**]

राजा—सारंगिए ! सव्वं वित्थरेण कधेहि। [**सारङ्गिके ! सर्वं विस्तरेण कथय**]

सारङ्गिका—एदं विण्णवीअदि, अणन्तरातिक्कन्तचउद्दसीदिअहे देवीए पोम्मराअमणिमई गोरी कदुअ भइरवाणन्देण प्पडिट्ठाविदा, सअं अ दिक्खा गहिदा। तदो ताए बिण्णत्तो जोगिससरो गुरुदक्खिणाणिमित्तं। भणिदं च तेण, जइ अवस्सं गुरुदक्खिणा दादव्वा, ता एसा दीअदु महाराअस्स।

(रंगमञ्च पर आकर)

सारंगिका—(**सामने देखकर**) महाराज तो मरकत-कुञ्ज में चले गये। कदलीगृह में भी घुस गये। इसलिये बढ़कर महारानी का सन्देश कहूँगी। (**पास जाकर**) महाराज की जय हो। महारानी कहती हैं कि आज शाम को मैं तुम्हारा विवाह कराऊँगी।

विदूषक—अरे ! कुसमय में ही यह कूष्माण्ड कैसे गिर पड़ा ?

राजा—सारंगिके ! सब विस्तार से कहो।

सारंगिका—ऐसा कहा जाता है कि पिछली चतुर्दशी के दिन महारानी ने पद्मराग-मणि की गौरी की प्रतिमा बनवाकर भैरवानन्द से उसकी प्राणप्रतिष्ठा करवाई और भैरवा-

---

टिप्पणी—अवलोक्य = देखकर—अव √लोकि + य—ल्यबन्त-इकार का लोप। परिणेतव्याः = विवाह किया जाना चाहिये।

टिप्पणी—अकाले कूष्माण्डस्य पतनम् = अकालकूष्माण्डपतनम् = कुसमय पर कोई अप्रासंगिक बात होना।

टिप्पणी—अनन्तरम् अतिक्रान्ता = अनन्तरातिक्रान्ता—सा चासौ या चतुर्दशी तद्दिवसे = अनन्तराति[illegible] पद्मरागमणिभिः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तदो देवीए विण्णत्तं, जं आदिसदि भअवं ति। उणो वि उल्लविदं तेण, अत्थि एत्थ लाडदेसे चण्डसेणो णाम राआ, तस्स दुहिदा घणसारमञ्जरि णाम सा देवण्णेहिं आदिट्ठा, एसा चक्कवट्टिघरिणी भविस्सदि त्ति। तदो महाराअस्स परिणेदव्वा, तेण गुरुदक्खिणा दिण्णा भोदि, भट्टा वि चक्कवट्टी किदो भोदि। तदो देवीए विहसिअ भणिदं, जं आदिसदि भअवं। अहं च विण्णविदुं पेसिदा गुरुस्स गुरुदक्खिणाणिमित्तं। [इदं विज्ञाप्यते, अनन्तरातिक्रान्तचतुर्दशीदिवसे देव्या पद्मरागमणिमयी गौरी कृत्वा भैरवानन्देन प्रतिष्ठापिता, स्वयञ्च दीक्षा गृहीता। ततस्तया विज्ञप्तो योगीश्वरो गुरुदक्षिणानिमित्तम्। भणितञ्च तेन, यद्यवश्यं गुरुदक्षिणा दातव्या, तदेषा दीयतां महाराजस्य। ततो देव्या विज्ञप्तं, यदादिशति भगवान् इति। पुनरपि उल्लपितं तेन, अस्ति अत्र लाटदेशे चण्डसेनो नाम राजा, तस्य दुहिता घनसारमञ्जरी नाम, सा दैवज्ञैरादिष्टा, एषा चक्रवर्त्तिगृहिणी भविष्यतीति; ततो महाराजेन परिणेतव्या, तेन गुरुदक्षिणा दत्ता भवति, भर्त्ताऽपि चक्रवर्ती कृतो भवति। ततो देव्या विहस्य भणितं यत् आदिशति भगवान्। अहञ्च विज्ञापयितुं प्रेषिता गुरोर्गुरुदक्षिणानिमित्तम्।]

विदूषकः—(विहस्य) एदं तं संविधाणअं सीसे सप्पो देसन्तरे वेज्जो। इह अज्ज विवाहो, लाडदेसे घणसारमञ्जरी। [एतत्तत् संविधानकं शीर्षे सर्पः, देशान्तरे वैद्यः। इहाद्य विवाहो, लाटदेशे घनसारमञ्जरी।]

नन्द को गुरु बना कर उनसे इष्टमन्त्र ग्रहण किया। फिर महारानी ने उनसे गुरुदक्षिणा लेने के लिए कहा। भैरवानन्द ने कहा कि अगर गुरुदक्षिणा देना ही चाहती हो तो यह महाराज के लिए दो। तब महारानी ने कहा—जो आपकी आज्ञा। फिर भैरवानन्द ने कहा—लाटदेश में चण्डसेन नाम का राजा है, उसकी घनसारमंजरी नाम की पुत्री है। उसके संबन्ध में ज्योतिषियों ने कहा है कि यह चक्रवर्ती राजा की रानी बनेगी। इसलिए महाराज से इसका विवाह कर देना चाहिए। यह गुरुदक्षिणा पर्याप्त होगी, महाराज भी तुम्हारे द्वारा चक्रवर्ती हो जायँगे। तब महारानी ने हँस कर कहा—जैसी आपकी आज्ञा और मुझे आपके पास गुरुदक्षिणा के निमित्त भेजा है।

विदूषक—(हँस कर) यह कैसा काम—सिर पर साँप, वैद्य दूसरे देश में। आज यहाँ विवाह और घनसारमञ्जरी लाटदेश में ?

निर्मिता = पद्मरागमणिमयी। प्रतिष्ठापिता = मूर्तौ प्राणप्रतिष्ठा कारिता। उल्लपितम् = उक्तम्—कहा। लाटदेशः = नर्मदा के पश्चिम का देश, इसमें सम्भवतः भड़ौच, बड़ौदा, अहमदाबाद और खैरा भी प्रायः शामिल थे।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

राजा—किं ते भइरवाणन्दस्स पहावो ण प्पच्चक्खो ?। (तां प्रति) कहिं संपदं भइरवाणन्दो ? [**किन्ते भैरवानन्दस्य प्रभावो न प्रत्यक्षः ?।**] (तां प्रति) (कुत्र साम्प्रतं भैरवानन्दः ?)

सारङ्गिका—देवीकारिदप्पमदुज्जाणस्स मज्झट्ठिदवडतरुमूले चामुण्डाअदणे भइरवाणन्दो देवी अ आअमिस्सदि; ता अज्जदक्खिणाविहिदो कोदुहलवरो विवाहो; ता इह ज्जेव्व देवेणे ठादव्वं। [**देवीकारितप्रमदोद्यानस्य मध्यस्थितवटतरुमूले चामुण्डायतने भैरवानन्दो देवी च आगमिष्यति; तदद्य दक्षिणाविहितः कौतूहलपरो विवाहः, तदिहैव देवेन स्थातव्यम्**]

(इति परिक्रम्य निष्क्रान्ता)

राजा—वअस्स ! सव्वं एदं भइरवाणन्दस्स विजिंभिदं त्ति तक्केमि। [**वयस्य ! सर्वमेतत् भैरवानन्दस्य विजृम्भितमिति तर्कयामि।**]

विदूषकः—एव्वं णेदं। ण क्खु मिअलंछणमन्तरेण अण्णो मिअंकमणिपुत्तलिअं प्पस्सेदअदि। ण क्खु सरअसमीरमन्तरेण सेफालिआकुसुमक्करं विकासेदि। [**एवमेतत्। न खलु मृगलाञ्छनमन्तरेण अन्यो मृगाङ्कमणिपुत्तलीं प्रस्वेदयति। न खलु शरत्समीरमन्तरेण शेफालिकाकुसुमोत्करं विकासयति।**]

राजा—क्या तुम्हें भैरवानन्द जी की शक्ति का पता नहीं है ? (**सारंगिका से**) इस समय भैरवानन्द कहाँ हैं ?

सारंगिका—महारानी के द्वारा बनवाये हुये प्रमदोद्यान के मध्य में स्थित वटवृक्ष के नीचे चामुण्डा देवी के मन्दिर में भैरवानन्द और महारानी आयेंगी। आज दक्षिणा में कुतूहल से विवाह किया जायगा, महाराज यहाँ ठहरें।

(इस तरह घूमकर चली जाती है)

राजा—मित्र ! यह सब भैरवानन्द का काम है ऐसा सोचता हूँ।

विदूषक—ऐसा ही है। चन्द्रमा के अतिरिक्त और कौन चन्द्रकान्तमणि की पुतली को पिघला सकता है ? शरद् ऋतु की शेफालिका के फूलों को पवन के अतिरिक्त और कौन खिला सकता है ?

टिप्पणी—चामुण्डायाः आयतने = चामुण्डायतने = चामुण्डामन्दिरे। √स्था + तव्य= स्थातव्यम् = ठहरना चाहिये।

टिप्पणी—विजृम्भितम् = विलसितम्—करिश्मा। तर्कयामि = स्मरण करता हूँ।

टिप्पणी—मृगलाञ्छनमन्तरेण = चन्द्रमा के बिना अन्तरेण के योग में द्वितीया

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(ततः प्रविशति भैरवानन्दः)

भैरवानन्दः—इअं सा वडतरुमूले णिब्भिण्णस्स सुरङ्गादुआरस्स पिहाणं चामुण्डा। [इयं सा वटतरुमूले निर्भिन्नस्य सुरङ्गाद्वारस्य पिधानं चामुण्डा।] (हस्तेन प्रणम्य पठति)—

कप्पन्तकेलिभवणे कालस्स पुराणरुहिरसुरम्।
जअदि पिअन्ती चण्डी परमेट्ठिकवालचसएण॥ १९॥
[कल्पान्तकेलिभवने कालस्य पुराणरुधिरसुराम्।
जयति पिबन्ती चण्डी परमेष्ठिकपालचषकेण॥ १९॥]

(उपविश्य)—अज्ज वि ण णिग्गच्छदि सुरङ्गादुआरेण कप्पूरमञ्जरी। [अद्यापि न निर्गच्छन्ति सुरङ्गाद्वारेण कर्पूरमञ्जरी]

अन्वयः—कालस्य कल्पान्तकेलिभवने चण्डी परमेष्ठिकपालचषकेण पुराणरुधिरसुराम् पिबन्ती जयति।

सरलार्थः—महाकालरूपिणो रुद्रस्य संहारकालरूपिणि केलिभवने ब्रह्मणः कपालरूपेण पात्रेण पूर्वतनप्राणिनां रुधिररूपं मद्यं पिबन्ती चण्डी सर्वोत्कर्षेण वर्तते।

(तब भैरवानन्द रङ्गमञ्च पर आता है)

भैरवानन्द—वटवृक्ष के नीचे खुले हुये सुरङ्ग द्वार पर यह चामुण्डा देवी विराजमान है।

(हाथ से प्रणाम कर पढ़ता है)

महाकालरूपी रुद्र के प्रलयकालरूपी क्रीडामन्दिर में ब्रह्मा के कपालरूपी प्याले से प्राणियों के रुधिररूपी मद्य को पीती हुई चण्डी की जय हो॥ १९॥

(बैठकर) कर्पूरमञ्जरी सुरङ्ग के द्वार से अभी तक नहीं निकली।

विभक्ति। प्रस्वेदयति = आर्द्रयति–पिघलाता है। प्र+√स्वेदि (ण्यन्त) से लट् लकार। शेफालिकाकुसुमानामुत्करम् = शेफालिकाकुसुमोत्करम्, काली नेवारी के फूलों के समूह को।

१. पिधानम् = आच्छादनम्–ढकना।

टिप्पणी—कल्पान्तः एव केलिभवनम्, तस्मिन् = कल्पान्तकेलिभवने = संहारकाल-क्रीडामन्दिरे। परमेष्ठिनः कपालः एव चषकस्तेन = परमेष्ठिकपालचषकेण = ब्रह्मकपालरूप-पानपात्रेण। पुराणरुधिरसुराम् = पूर्वतनप्राणिनां शोणितरूपमद्यम्। पिबन्ती = पीती हुई–√पा+पिब्+श+शतृ+ङीप्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(ततः प्रविशति सुरङ्गोद्घाटितकेन कर्पूरमञ्जरी)

कर्पूरमञ्जरी--भअवं ! पणमिज्जसि । [भगवन् प्रणम्यसे]

भैरवानन्दः—उइदं वरं लहेसु । इह ज्जेव उवविस । [उचितं वरं लभस्व । इहैव उपविश]

(कर्पूरमञ्जरी तथा करोति)

भैरवानन्दः—(स्वगतम्) अज्ज वि ण आअच्छदि देवी । [अद्यापि नागच्छति देवी]

(प्रविश्य)

राज्ञी—(परिक्रम्य अवलोक्य च) इअं भअवदी चामुण्डा । (प्रणम्य अवलोक्य च) अए ! इअं कप्पूरमज्जरी !! ता किं णेदं ? । (भैरवानन्दं प्रति) इदं विण्णवीअदि, णिअभवणे कदुअ विवाहसामग्गिं आअदम्हि, तदो तं गेण्हिअ आअमिस्सं । [इयं भगवती चामुण्डा । (प्रणम्य अवलोक्य च) अये । इयं कर्पूरमञ्जरी !! तत् किमिदम् ? (भैरवानन्दं प्रति) इदं विज्ञाप्यते, निजभवने कृत्वा विवाहसामग्रीम् आगताऽस्मि, ततस्तां गृहीत्वा आगमिष्यामि]

भैरवानन्दः—वच्छे ! एव्वं करीअदु । (वत्से ! एवं क्रियताम्)

(राज्ञी व्यावृत्य परिक्रामति)

(तब सुरङ्ग के द्वार से कर्पूरमञ्जरी निकलती है)

कर्पूरमञ्जरी—भगवन् ! प्रणाम करती हूँ ।

भैरवानन्द—उचित वर पाओ । यहाँ ही बैठो ।

(कर्पूरमञ्जरी ऐसा ही करती है)

भैरवानन्द—(अपने मन में) अब भी महारानी नहीं आ रही हैं ।

(प्रवेश कर)

राज्ञी—(घूम कर और देख कर) यह भगवती चामुण्डा है । (प्रणाम कर और देखकर) अरे यह कर्पूरमञ्जरी है । यह क्या बात है (भैरवानन्द से) अपने यहाँ विवाह सामग्री तैयार कर आई हूँ, अब उसको लेकर आती हूँ ।

भैरवानन्द—वत्से ऐसा करो ।

(महारानी दूर जाकर घूमती है)

टिप्पणी—आकाशे–बिना किसी और पात्र के रङ्गमञ्च पर बात करना, न कही हुई बात को भी सुना हुआ समझकर बोलना आकाशभाषित कहलाता है-किं ब्रवीष्येवमित्यादि

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भैरवानन्दः—(विहस्य स्वगतम्) इअं कप्पूरमञ्जरीठाणं अण्णेसिदुं गत (प्रकाशम्) पुत्ति कप्पूरमञ्जरि ! सुरङ्गादुआरेण ज्जेव्व तरिदपदं गदुअ सुठ्ठाणे चिट्ठ, देवी आअमणे उणो आअंतव्वं । [इयं कर्पूरमञ्जरीस्थानमन्वेष्टुं गता (प्रकाशम्) पुत्रि कर्पूरमञ्जरि ! सुरङ्गाद्वारेणैव त्वरितवदं गत्वा स्वस्थाने तिष्ठ, देव्यागमने पुनरागन्तव्यम]

(कर्पूरमञ्जरी तथा करोति)

देवी—एदं रक्खागेहम् । (प्रविश्यावलोक्य च) अए ! इअं कप्पूरमञ्जरीं !! सा का वि सरिच्छा मए दिट्ठा ! वच्छे कप्पूरमञ्जरि ! कीरिसं दे सरीरम् ?। (आकाशे) किं भणासि, मह सरीरे वेअणा ? (स्वगतम्) ता पुणो तहिं गमिस्सं । (प्रविश्य पार्श्वतोऽवलोक्य च) हला सहीओ ! विवाहोवकरणाईं लहुं गेण्हिअ आअच्छध । [इदं रक्षागृहम् । (प्रविश्यावलोक्य च) अये ! इयं कर्पूरमञ्जरी !! सा काऽपि सदृशी मया दृष्टा । वत्से कर्पूरमञ्जरि ! कीदृशं ते शरीरम् ? (आकाशे) किं भणसि मम शरीरे वेदना ? । (स्वगतम्) तत् पुनस्तत्र गमिष्यामि । (प्रविश्य पार्श्वतोऽवलोक्य च) हला सख्यः ! विवाहोपकरणानि लघु गृहीत्वा आगच्छत]

(इति परिक्रामति)

भैरवानन्द—(हँसकर, अपने आप) यह कर्पूरमञ्जरी को ढूंढने गई । (प्रकाश में) पुत्री कर्पूरमञ्जरी ! सुरङ्ग के दरवाजे से शीघ्र ही जाकर अपने स्थान पर ठहरो, महारानी के आने पर फिर आ जाना ।

(कर्पूरमञ्जरी ऐसा ही करती है)

देवी—यह रक्षाघर है । (घुसकर और देखकर) अरे यह कर्पूरमञ्जरी है । उससे कुछ सदृश तो मैंने अभी देखी थी । वत्से कर्पूरमञ्जरि ! तुम्हारा शरीर कैसा है । (आकाश में) क्या कहती है—मेरे शरीर में दर्द है । (अपने मन में) फिर वहाँ जाऊँगी । (घुसकर और एक तरफ देखकर) अरे सहेलियो ! विवाह का सामान लेकर शीघ्र आओ ?

(घूमती है)

विना पात्रं ब्रवीति यत् । श्रुत्वेवानुक्तमपि चेत्तत्स्यादाकाशभाषितम् ।। विवाहोपकरणानि = विवाह का सामान ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(प्रविश्य कर्पूरमञ्जरी तथैवास्ते)

राज्ञी—(पुरोऽवलोक्य) इअं कप्पूरमञ्जरी !! [इयं कर्पूरमञ्जरी !!]

भैरवानन्दः—वच्छे ! विब्भमलेहाए आणीदाइं विवाहोअरणाइं ? [वत्से ! विभ्रमलेखया आनीतानि विवाहोपकरणानि ?]

देवी—आणीदाइं । किं उण घणसारमञ्जरीसमुचिदाइं आहरणाइं विसुमरिदाइं । ता उणो गमिस्सं । [आनीतानि । किं पुनर्घनसारमञ्जरीसमुचितानि आभरणानि विस्मृतानि । तत्पुनर्गमिष्यामि]

भैरवानन्दः—एव्वं करीअदु । [एवं क्रियताम्]

(देवी नाटितकेन निष्क्रामति[1])

भैरवानन्दः—पुत्ति कप्पूरमञ्जरि ! तह जेव्व करीअदु । [पुत्रि कर्पूरमञ्जरि । तथैव क्रियताम्]

(कर्पूरमञ्जरी निष्क्रान्ता)

राज्ञी—(रक्षागृहं प्रविश्य कर्पूरमञ्जरीं दृष्ट्वा) आए ! सारिच्छएण विडंविदम्हि !! (स्वगतम्) झाणविमाणेण णिव्विग्घपरिसप्पिणा तं आणेदि महाजोई । (प्रकाशम्) सहीओ ! जं जं णिवेदिदं तं तं गेण्हिअ आअच्छध । [अये ! सादृश्येन विडम्बिताऽस्मि[2] !! (स्वगतम्) ध्यानविमानेन निर्विघ्नपरि-

---

(कर्पूरमञ्जरी आती है और वैसे ही बैठती है)

राज्ञी—(सामने देखकर) यह कर्पूरमञ्जरी है ।

भैरवानन्द—वत्से ! क्या विभ्रमलेखा विवाह का सामान ले आई ?

देवी—विवाह का सामान आ गया । लेकिन घनसारमञ्जरी के लायक गहने भूल आई । इसलिए फिर जाऊँगी ।

भैरवानन्द—ऐसा ही करो ।

भैरवानन्द—पुत्रि कर्पूरमञ्जरी ! वैसा ही करो ।

(कर्पूरमञ्जरी निकल जाती है)

राज्ञी—(रक्षागृह में जाकर और कर्पूरमञ्जरी को देखकर) अरे ! सादृश्य से तो मैं आश्चर्य में पड़ गई हूँ । (अपने मन में) बिना रोक टोक के चलने वाले ध्यान-

---

टिप्पणी—घनसारमञ्जर्याः समुचितानि घनसारमञ्जरीसमुचितानि = घनसारमञ्जरी के लायक ।

१. निष्क्रामति = निकलती है । २. विडम्बिता = धोखा खाई हुई । निर्विघ्नम् परिसर्पति–तेन निर्विघ्नपरिसर्पिणा = निर्बाधगतिना ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सर्पिणा तामानयति महायोगी। (प्रकाशम्) सख्यः! यत् यन्निवेदितं तत्तत् गृहीत्वा आगच्छत]

(चामुण्डायतनप्रवेशनाटितकेन तामवलोक्य)

अहो सारिच्छअं (अहो! साद्दश्यम्)

भैरवानन्दः—देवि उवविस। महाराओ वि आअदो ज्जेव्व वट्टदि [देवि! उपविश। महाराजोऽपि आगत एव वर्त्तते।]

(ततः प्रविशति राजा विदूषकः सारङ्गिका च)

भैरवानन्दः—आसणं महाराअस्स। [आसनं महाराजस्य]

(सर्वे यथोचितमुपविशन्ति)

राजा—(नायिकां प्रति) एसा सरीरिणी मअरद्धअपारिद्धिआ, देहन्तरेण संठिदा सिंगाररसलच्छीव? दिअससंचारिणी पुण्णिमाचन्दचन्दिआ; अवि अ प्पगुणगुणमाणिक्कमञ्जूसा, रअणमई अञ्जणसलाआ, तधा अ एसा रअणकुसुमणिप्पण्णा महुलच्छी। किं च—[एषा शरीरिणी मकरध्वजपारिध्वजिका, देहान्तरेण संस्थिता श्रृङ्गाररसलक्ष्मीरिव; दिवसञ्चारिणी पूर्णिमा चन्द्रचन्द्रिका; अपि च प्रगुणगुणमाणिक्यमञ्जूषा, रत्नमयी अञ्जनशलाका, तथा चैषा रत्नकुसुमनिष्पन्ना मधुलक्ष्मीः। किञ्च—]

रूपी विमान से महायोगी उसको लाया है। (प्रकाश में) सखियों! जो जो मंगाया गया है, वह-वह सामान लेकर आओ।

(चामुण्डा देवी के मन्दिर में प्रवेश का अभिनय कर और कर्पूरमञ्जरी को देखकर) आश्चर्य है, कैसी समानता है?

भैरवानन्द—देवी! बैठो। महाराज भी आये हुए हैं।

(तब राजा, विदूषक और सारङ्गिका रंगमञ्च पर आते हैं)

भैरवानन्द—महाराज के लिए आसन दो।

(सब यथास्थान बैठते हैं)

राजा—(नायिका से) कामदेव की पताका को उठाने वाली यह साक्षात् श्रृङ्गार रस की शोभा की तरह देहान्तर से विराजमान है, दिल में चमकने वाली पूर्णिमा के चन्द्र की चाँदनी है, उच्चकोटि के रत्नों की मन्जूषा जैसी है, रत्नों से बनी हुई, अञ्जन लगाने की सलाई जैसी है तथा रत्नकुसुमों से युक्त वसन्तशोभा-सी साक्षात् प्रतीत होती है। और क्या :—

टिप्पणी—मअरद्धअ पारिद्धिआ = मकरध्वजपारिध्वजिका = कामदेवपताका·

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भुअणजअपडाआ रूअसोहा इमीए
जह जह णअणाणं गोअरे जस्स जाइ।
वसइ मअरकेदू तस्स चित्ते विचित्तो
वलइअधणुदंडो पुंखएहिं सरेहिं ॥ २०॥

[भुवनजयपताका रूपशोभाऽस्या
यथा यथा नयनयोर्गोचरं यस्य याति।
वसति मकरकेतुस्तस्य चित्ते विचित्रो
वलयितधनुर्दण्डः पुङ्खितैः शरैः ॥ २० ॥]

विदूषकः—(जनान्तिकम्) सच्चं किदं तुए आभाणकं। तडं गदाए वि णावाए ण विससीदव्वं; ता तुण्हि चिट्ठ। **[सत्यं कृतं त्वया आभाणकम्। तटं गताया अपि नौकाया न विश्वसितव्यम् तत्तूष्णीं तिष्ठ]**

अन्वयः—अस्याः भुवनजयपताका रूपशोभा यस्य यथा यथा नयनयोः गोचरं याति, तस्य चित्ते विचित्रः मकरकेतुः पुङ्खितैः शरैः वलयितधनुर्दण्डः वसति।

सरलार्थः—कामस्य सन्दीपिनी अस्याः सौन्दर्यश्रीः येन विलोक्यते, तस्य चित्तम् सज्जीकृतधनुषा कामदेवेन व्यथितम् सञ्जायते ॥ २० ॥

कामदेव की पताका के समान इसकी सुन्दरता जिसकी आंखों में समा जाती है, उसी के चित्त में अद्भुत कामदेव बाण चढ़े हुए टेढ़े धनुष के साथ वास करने लगता है ॥ २० ॥

विदूषक—(जनान्तिक में) तुम्हारा मनोरथ सफल हो गया। क़िनारे पर पहुँची हुई भी नाव का विश्वास नहीं करना चाहिए, इसलिए चुप ही रहो।

वाहिनी, कामदेव की पताका को उठाने वाली अर्थात् काम को उद्दीप्त करने वाली। दिवसे सञ्चारिणी = दिवससञ्चारिणी = दिन में चमकने वाली। पूर्णिमायाः चन्द्रस्य चन्द्रिका = पूर्णिमाचन्द्रचन्द्रिका = पूर्णिमाचन्द्रज्योत्स्ना। प्रगुणाः गुणाः यस्याः सा प्रगुणगुणा, सा चासौ माणिक्यमञ्जूषा = प्रगुणगुणमाणिक्यमञ्जूषा = माणिक्यपेटिका। अञ्जनशलाका = अञ्जन लगाने की सलाई। मधोः लक्ष्मीः = मधुलक्ष्मीः = वसन्तशोभा।

टिप्पणी—मकरः केतौ यस्य सः मकरकेतुः = कामदेवः। वलयितः धनुर्दण्डः येन सः वलयितधनुर्दण्डः = मण्डलितकार्मुकयष्टिः = पुङ्खितैः = सहितैः, चढ़ाये = हुये। भुवनजयस्य पताका = भुवनजयपताका = कामदेवपताका ॥ २० ॥

टिप्पणी—आभाणकम् = मनोरथः। विश्वसितव्यम् = विश्वास करना चाहिये। तूष्णीम्=चुपचाप।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

राज्ञी—(कुरङ्गिकां प्रति) तुमं महाराअस्स णेवच्छं कुरु। सारङ्गिआ घणसारमञ्जरीए करेदु। [त्वं महाराजस्य नेपथ्यं कुरु। सारङ्गिका घनसार-मञ्जर्या; करोतु]

(इत्युभे उभयोर्विवाहनेपथ्यकरणं नाटयतः)

भैरवानन्दः—उवज्झाओ हक्कारीअदु। [उपाध्याय आकार्यताम्[1]]

राज्ञी—अज्जउत्त ! एसो उवज्झाओ अज्जकविञ्जलो चिट्ठदि; ता करेदु अग्गिआरिअं। [आर्यपुत्र ! एष उपाध्याय आर्यकपिञ्जलस्तिष्ठति; तत् करोतु अग्रयाचार्यकम्[2]]

विदूषकः—एस सज्जेम्हि। भो वअस्स ! उत्तरीए गण्ठि दाइस्सं, दाव हत्थेण हत्थं गेण्ह कप्पूरमञ्जरीए। [एष सज्जो[3]ऽस्मि। भो वयस्य ! उत्त-रीये[4] ग्रन्थि दास्यामि, तावद्धस्तेन हस्तं गृहाण कर्पूरमञ्जर्याः]

राज्ञी—(सचमत्कारम्) कुदो कप्पूरमञ्जरी !। [कुतः कर्पूरमञ्जरी ?]

भैरवानन्दः—(तं तस्या भावमुपलभ्य विदूषकं प्रति) तुमं सुट्ठुतरं भुल्लो सि, जदो कप्पूरमञ्जरीए घणसारमञ्जरी त्ति णामान्तरं जाणासि। [त्वं सुष्ठुतरं भ्रान्तोऽसि, यतः कर्पूरमञ्जर्या घनसारमञ्जरीति नामान्तरं जानासि]

राज्ञी—(कुरंगिका से) तू महाराज के वस्त्र सजा। सारंगिका घनसारमञ्जरी के वस्त्र तैयार करती है।

(दोनों विवाह के वस्त्र तैयार करने का अभिनय करती हैं)

भैरवानन्द—पुरोहित को बुलाओ ?

राज्ञी—आर्यपुत्र ! यह आर्य कपिंजल खड़े हुए हैं, आइये, पुरोहित का कार्य कीजिये।

विदूषक—मैं तैयार हूँ। प्रिय मित्र ! दुपट्टे में गाँठ लगाता हूँ, तब तक अपने हाथ से कर्पूरमञ्जरी का हाथ पकड़ो।

राज्ञी—(चौंककर) कर्पूरमञ्जरी कहाँ है !

भैरवानन्द—(रानी के उस भाव को जानकर विदूषक से) तुम तो भूल में हो, जो घनसारमञ्जरी को कर्पूरमञ्जरी का दूसरा नाम समझते हो।

---

१. आकार्यताम् = बुलाया जाना चाहिए। आ √कारि+य+ताम् (कर्मवाच्य–लोट् लकार प्रथमपु० एकव०)।

२. अग्रे कृतः आचार्यः = अग्रयाचार्यः, स एव अग्रयाचार्यकः, तम् = अग्रयाचार्यकम् = पुरोहितम्। ३. सज्जः = तैयार। ४. उत्तरीय = दुपट्टा।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

राजा—(करमादाय)—

जे कण्टआ तिउसमुद्धफलाण सन्ति जे केअईकुसुमगब्भदलावलीसु ।
फंसेण णूणमिह मज्ज सरीरअस्स ते सुन्दरीअ बहला पुलअंकुराओ ॥ २१ ॥

[**ये कण्टकास्त्रपुषमुग्धफलानां सन्ति ये केतकीकुसुमगर्भदलावलीषु ।**
स्पर्शेन नूनमिह मम शरीरस्य ते सुन्दर्या बहलाः पुलकाङ्कुराः ॥ २१ ॥]

विदूषकः—भो वअस्स ! भामरीओ दिज्जन्तु । हुदवहे लाजञ्जलीओ खिवीअदु । [**भो वयस्य ! भ्रामर्यो दीयन्ताम् । हुतवहे लाजाञ्जलयः क्षिप्यन्ताम्**]

(राजा भ्रमणं नाटयति । नायिका धूमेन व्यावृत्तमुखी[1] तिष्ठति
राजा परिणयति । राज्ञी सपरिवारा निष्क्रान्ता)

अन्वयः—त्रपुषमुग्धफलानाम् ये कण्टकाः सन्ति, केतकीकुसुमगर्भदलावलीषु ये कण्टकाः सन्ति, ते नूनम् इह सुन्दर्याः स्पर्शेन मम शरीरस्य बहलाः पुलकाङ्कुराः (सन्ति) ।

सरलार्थः—त्रपुषाख्यलताविशेषस्य यानि सुन्दराणि कोमलानि च फलानि सन्ति तेषां ये सूक्ष्माग्राः, ये च केतकीकुसुमानां गर्भदलानां पङ्क्तिषु कण्टकाः सन्ति, ते निश्चयेन कर्पूरमञ्जरीस्पर्शेन जातानां मे शरीरे रोमाञ्चानां समूहाः सन्ति ।

राजा—(हाथ पकड़कर)—

त्रपुषलता के सुन्दर और कोमल फूलों में जो काँटे होते हैं तथा केतकी के फूलों के अन्दर के पत्तों में जो कांटे होते हैं, वे निश्चय ही कर्पूरमञ्जरी के स्पर्श से उत्पन्न मेरे शरीर के रोमाञ्चों का समूह हैं ॥ २१ ॥

विदूषक—प्रिय मित्र ! भांवरे दो (अग्नि की परिक्रमा करो) और अग्नि में खीलें छोड़ो ।

(राजा घूमने का अभिनय करता है । कर्पूरमञ्जरी धुएँ से मुख घुमाये खड़ी रहती है । राजा विवाह करता है । रानी अपने परिवार के साथ बाहर चली जाती हैं)

टिप्पणी—कण्टकाः = कांटे, सूक्ष्म अग्रभाग । गर्भदलावलीषु = अन्दर के पत्तों की पंक्तियों में । बहलाः = बहवः पुलकाङ्कुराः = रोमाञ्चनिकराः ॥ २१ ॥

टिप्पणी—भ्रामर्यः = अग्नि की परिक्रमा करना । हुतवहः = अग्नि । लाजाञ्जलयः = लाजाओं (खीलों) की अञ्जलियाँ । क्षिप्यन्ताम् = फेंकी जाय-√ क्षिप्+य+अन्ताम्-(कर्मवाच्य० प्रथम० बहुव०) ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

१. व्यावृत्तं मुखं यस्याः सा व्यावृत्तमुखी = मुखमन्यतः कृत्वा, मुँह फेरे हुये ।

भैरवानन्दः—विवाहे दक्खिणा दिज्जदु आचरिअस्स। [विवाहे दक्षिणा दीयताम् आचार्यस्य]

राजा—दिज्जदु वअस्स ! गामसअं ते दिण्णं [दीयते। वयस्य ! ग्रामशतं ते दत्तम्]

